CC-0. In Public Domain. Digitization by eGangotri

श्रीः

अखिलभारतवर्षीय श्रीसंस्कृतसाहित्यसम्मेलनस्य पञ्चमवर्षीयं कार्यविवरणम्



प्रयागीय स्वागतकारिमण्डलेन प्रकाशितम्।

विना मूल्यं वितीर्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पण्डित रामजीलाल शर्मा के प्रबन्ध से
हिन्दी प्रेस, प्रयाग में मुद्रित।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अखिलभारतवर्षीय-श्रीसंस्कृतसाहित्यसम्मेलनस्य

पञ्चमवर्षीयं कार्यविवरणम्

प्रायः सुविदितमेवैतत्सर्वेषामपि विद्यानुरागिणां महोदयानां यत्तत्रभवत्याः संस्कृतभाषाया विगतं गौरवं भूयोऽपि भूमण्डले व्यवस्थापयितुं संस्कृतसाहित्यसम्मेलननाम्ना प्रसिद्धा काप्येका महती विद्वत्परिषत् प्रतिष्ठापिता वर्त्तते।

तस्या एतस्याश्चत्वार्यधिवेशनानि (द्वे हरिद्वारे तृतीयं मथुरायां, चतुर्थं लवपुरे) अतः पूर्वं नानादिग्देशागतानां विदुषामुपस्थितौ संजातानि। तेषां कार्यविवरणं च पृथङ्मुद्रापितं सम्मेलनेन समुपस्थापितं च विद्वज्जनानां सेवायाम्। अद्य, त्विदं पञ्चमाब्दीयं कार्यविवरणं तत्रभवतां गीर्वाणवाणीरसिकानां सेवायां समुपस्थाप्यते।

आर्यशास्त्रप्रामाण्यानुसारं निखिलेऽपिजगतीतले ललामभूतमिदमस्माकं समग्रमेव भारतं वर्षम्, यत्र जन्मावाप्तये देवानामपि नित्यमुत्कण्ठितत्वं तत्र तत्र वर्ण्यमानं श्रूयते।

अत्रापि च भारते येषांयेषांधन्यानांदेशानां पतितपावन्या श्रीसुरस्रोतस्विन्या प्रक्षालितरजःकणत्वं विद्यते, ते गौरवेण तदितरानतिशेरते। जाह्नवीजललवसंसर्गपवित्रतमेष्वपि देशेषु त्रयाणां मुख्यत्वं श्रूयते तद्यथा—

सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा।
गङ्गाद्वारे प्रयागे च गङ्गासागरसंगमे॥

तत्र गङ्गाद्वारवत् संस्कृतसाहित्यसमुद्धारद्वारमपि श्रीहरिद्वारमेवाभवत्। यतः संस्कृतसाहित्यसम्मेलनमप्यादौ द्वे वर्षे

Kirtikant-Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यावत् तत्रैव संमिलितमभूत्। ततश्चेदं तृतीयेवर्षे श्रीमथुरायां चतुर्थे च लवपुरे विहृत्य पञ्चमे वर्षे श्रीप्रयागक्षेत्रे पदार्पणमकरोत्। तदेतत् क्षेत्रं न केवलं स्मृतिषु, पुराणेष्वेव वा, प्रत्युत श्रुतिष्वपि कृतोल्लेखं वर्त्तते। अतएव चात्र पुण्यतमे क्षेत्रे सम्मिलितस्य संमेलनस्यापि काप्यपूर्वैव शोभाभवत् तद्यथा—

माघशुक्ला प्रतिपत् सं० १९७४।

मेयोहालनाम्ना प्रसिद्धं भव्यं भवनं वर्षेऽस्मिन् संस्कृतसाहित्यसम्मेलनाय विनियमितमभूत्। मध्याह्नोत्तरमेकवादनसमयादारभ्यैवात्र स्थानीया विदेशीयाश्च सुप्रसिद्धा विद्वांसः समागममनुग्रहं प्रारभन्त।

द्विवादनसमयेपूर्णप्रायमभूत्सभासदनं सामाजिकैः। अस्मिन्नेव चावसरे निखिलशास्त्रनिष्णातः साहित्यकलाकुशलः पण्डितप्रकाण्डः भासनाटकादीनामनेकेषां दुर्लभप्रबन्धानां संशोध्यप्रकाशयिता त्रावङ्कोरराज्यस्य प्रधानो विद्वान् श्रीमान् टी गणपतिशास्त्रिमहोदयः सभामण्डपे पादार्पणं व्यदधात्। स्वागतकारिण्याः प्रधानेन महामहोपाध्यायेन श्रीगङ्गानाथझामहोदयेन, अन्यैश्च सदुपस्थितैः सुप्रसिद्धैर्विद्वद्भिर्महता हर्षेण सह कतिचित्पदानिपुरो गत्वा महता सत्कारेण समानीय पीठे स प्रतिष्ठापितः। ततश्च कार्यारम्भोऽभवत्।

श्रीमता गजानन्दमहोदयेन (मैनपुरीवास्तव्येन भजनोपदेशकेन) नितान्तमोजस्विनाऽपि मधुरतरेण स्वरेण स्वागतगीतिर्गीता। यस्याः श्रवणेन रसप्रमोदनिर्भरः सर्वतश्चित्रलिखित इवाभवत् सभामण्डपः, तदुत्तर च महामहोपाध्यायेन श्रीमता डाक्टर गङ्गानाथझामहोदयेन परमसम्मानसूत्रकैर्वाक्यैः स्वागतविधिं यथानियममनुष्ठाय सभापतिनिर्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चनाथ प्रस्तावः कृतः । ततः श्रीमता सीतारामशास्त्रिमहोदयेन निर्वाचयिष्यमाणस्य सभापतेः श्री टी गणपतिशास्त्रिणो वैदुष्यविषये संस्कृतसाहित्यसेवापरायणत्वविषये च सारगर्भितैरोजस्विभिर्वाक्यैः किञ्चिदावेद्य महामहोपाध्याय श्रीगङ्गानाथझा महोदयैः प्रस्तुतस्य प्रस्तावस्यानुमोदनं कृतम् । तदनन्तरं जामनगरवास्तव्यैः श्रीहाथीभाई शास्त्रिभिरलवरवासतव्यः श्रीचन्द्रदत्तशर्ममहोदयैश्च तस्यैव समर्थनं समुचितैः शब्दैः कृतम् । एवं यथावत् प्रस्तावसमर्थनानुमोदनैः सम्पन्ने सभापतिवरणविधौ सभापतिमहोदयस्य वक्षःस्थलं सौरभसम्भारसमुद्गारिणा पुष्पमाल्येन समलंकृतम् । सामाजिकैश्च करतलध्वनिना हार्दिकः प्रमोदः प्रकटीकृतः । ततश्च प्रधानासनमधिष्ठाय श्रीमता सभापतिमहोदयेन स्वीया सूक्तिसमलंकृता, बहुविधविज्ञेयविषयपरिपूर्णा, सुविस्तृता वक्तृता श्रावयितुमारब्धा ।

सभापतिवक्तृता

यदिदमिदानीमस्यां महासभायां सभापतित्वं स्वागतकारिणीसमितिर्माननीया मह्यं ददाति, तदहमतदर्होऽपि समितेर्महाफलः प्रसाद इति ग्रहः प्रतिगृह्णामि, अस्य हि समितिनियोगस्यानुष्ठानप्रसक्त्या संस्कृतसाहित्यसम्मेलनसंस्थां प्रति कैङ्कर्यलवः कश्चिन्मम सिद्धो भवति, गङ्गां च भगवतीं मम पूर्वतरे मासि सेवित्वा स्वदेशं प्राप्तमात्रस्य तामिदानीं पुनरपि सेवितुमवसरः संघटितो भवति, अस्यानुग्रहस्य समितौ कृतज्ञतां शाश्वतीं वहामि । अत्र विषयेऽनन्तशयनराज्याधीश्वरं महामहिमानं महाराजराजमपि भक्तिविशुद्धेन चेतसेदानीमवश्यस्मर्तव्यमहं स्मरामि, स हि कल्याणाभिनिवेशी सभा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मिमामुपस्थातुमभिलषन्तं पोष्यपरमाणुं मामनुमोदमानः परमया कृपयान्वमन्यत ।

दिष्ट्या चिरकांक्षितदर्शनां सभामिमामद्याहमुपतिष्ठे, संस्कृतसाहित्यसम्मेलनस्य पञ्चमोऽयमधिवेशनमहोत्सवो वर्तते एतदीयेषु कर्मस्वारब्धव्येषु माङ्गलिकमादावस्मच्चक्रवर्तिनो युरोपयुद्धे विजयाशंसनं प्रकृत्यैव राजभक्तैरस्माभिरवश्यं कर्तव्यम् । युरोपयुद्धं हि नाम विदेशं भारतवर्षं च चिराय सर्वतः परिपीड्यदद्यापि न प्रशान्तम् । तत्प्रशमायत्ताश्चास्माकं सर्वारम्भसिद्धयः, तदिममाशिषमाशास्महे—

श्रीमते ऊर्जदेवाय विष्वक्सेनो महारणे ।
जयं बहुफलं देयादस्माकं चक्रवर्त्तिने ॥

इमं संग्रामं महाभारतवर्णितात् संग्रामादन्यूनमहिमानं शृणुमः । किन्तु यदा महाभारतसंग्रामः, तदा दैवी सरस्वती संस्कृताख्या सर्वतः पुष्टिमती चोपासकैरुपास्यमाना पर्यखेलत, यस्याः प्रसादान्महर्षिर्व्यासस्तदुपश्लोकननिपुणः सुलभ आसीत् । अस्मिन् पुनः प्रकृतसंग्रामकाले तथाविधव्यासलाभप्रत्याशाया नैवावकाशः, दैवी हि सरस्वती आसु शताब्दीषूपासकविशेषानलभमाना कतमस्मै प्रसादं करिष्यति ।

तामेनां परिक्षीणप्रचारां सर्वत उपासनबहुलोकरणेन प्रचुरप्रचारलक्षणाभ्युदयशालिनीं कर्तुं महासभाया अस्याः समुद्यमः, तत्रेयमाशङ्का स्यात् संस्कृतभाषा नाम प्रागेव परस्सहस्रेभ्यःपरिवत्सरेभ्यो लोकस्याव्यवहार्यतां प्रतिपन्ना । तत् किमित्यस्या लोकानुपयोगिन्या अभ्युदय इदानीमेषितव्य इति । अत्रोच्यते—अस्ति तावल्लोकोपयोगित्वं संस्कृतस्य । भाषाः खलु आशैशवभाषणेन इहामुत्र फलसाधनोपदेशपरग्रन्थात्मना च जनैरुपयुज्यन्ते, संस्कृतभाषा च द्विधोपयुक्ता भूत्वा काल-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रमेण स्वोद्भवासु देश्यभाषासु भाषणीयतां प्राप्तासु द्वितीयस्यैव केवलमुपयोगप्रकारस्य विषयत्वं प्रतिपेदे। हिन्दवो हि साधारणं वाग्व्यवहारं स्वदेश्यभाषाभिः संस्कृतप्रभवाभिर्वर्तयन्त इहामुत्रफलसाधनं महन्महत् संस्कृतग्रन्थेभ्य एवाधीयानाः पुरान्वतिष्ठन्। अनुतिष्ठन्ति चाद्यत्वेऽपि केचत्। असंख्यानि किल सन्ति संस्कृते शास्त्राणि इहामुत्रहितसाधनोपदेशपराणि, तत्र—

कृषिः	वृक्षायुर्वेदः
वाणिज्यम्	निधिशास्त्रम्
शिल्पम्	लोहशास्त्रम्
पाकशास्त्रम्	रसतन्त्रम्
व्यवहारशास्त्रम्	ज्यौतिषम्
अर्थशास्त्रम्	गणितम्
वैद्यकम्	ज्योतिःफलशास्त्रम्
गजलक्षणादि	शाकुनम्
नाट्यम्	सामुद्रिकम्

इत्येवमादीनि योगक्षेमौपयिकानि शास्त्राणि।

वेदः षडङ्गः	वैष्णवम्
कर्मकाण्डविचारशास्त्रम्,	श्रौत-कल्प गृह्याणि
ज्ञानकाण्डविचारशास्त्रम्	धर्मशास्त्रम्
साङ्ख्यम्	पाञ्चरात्रागमः
योगः	शक्तितन्त्रम्
पाशुपतम्	शैवागमः
शाक्तम्	मन्त्रशास्त्रम्

इत्यादीनि देवतोपासनादिविषयाणि शास्त्राणि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऐहिकामुष्मिककर्मकलापस्य फलोदाहरणार्था इतिहासाः श्रीरामायणम्, महाभारतम्, इत्येवमादयः, तथा ब्राह्मं, पाद्मम्, इत्यादीनि च पुराणानि, साहित्य च लोकोत्तरसर्वविधमङ्गिभणितियोगसुभगं भाषान्तरदुर्लभं संस्कृते दीव्यति तस्यास्य सूत्रभाष्यानुभाष्यव्याख्योपव्याख्यादिनातिदूरविस्तृतस्य वाङ्मयप्रपञ्चस्यार्थाः प्रायः संस्कृताद्देवाधिगन्तुं शक्याः, न पुनस्तथाविधार्थदरिद्राभ्यो देश्यभाषाभ्यः, किञ्च हिन्दुषु भूयिष्ठैः श्रुतिस्मृतिविहितानि नित्यनैमित्तिककाम्यलक्षणानि कर्माणि बहूनि सन्ति। नियतानुपूर्वीकमन्त्रोच्चारणपूर्वमूहितमन्त्रोच्चारणपूर्वं चावश्यमनुष्ठेयानि, तेष्वितिकर्तव्यताज्ञानं विनियोज्य मन्त्रार्थज्ञानं चानुष्ठातॄणामावश्यकमिति तदर्थमवर्जनीयं तेषां संस्कृताध्ययनम्, भाषान्तरगतंविद्याध्ययनसाधारणमपरमपि फलं संस्कृताध्ययनस्य सिद्धमस्ति बुद्धिसंस्कारो नाम, किञ्च संस्कृतज्ञानेन देश्यभाषाव्युत्पत्तेः किमपि स्पृहणीयं सौष्ठवमुपजायते, देश्यभाषाणां तत्प्रभवत्वात्। अपि च भारतवर्षपुरावृत्तानामभ्यूहस्थानानि संस्कृतग्रन्थेषु पुरातनेषु भूयिष्ठंसन्निविष्टानि तानि संस्कृतव्युत्पन्न एव सम्यग् द्रष्टुं पुरावृत्तानि विभ्रष्टुं च शक्त इति तदपरं संस्कृताध्ययनस्य प्रयोजनम्, सत्सु चैतेषु प्रयोजनेषु संस्कृतस्य लोकोपयोगित्वं स्फुटमेव।

यत्तु केचित् संस्कृतभाषां मृतां वदन्ति, तन्मन्ये तत्तत्त्वाविमर्शननिबन्धनम्, सा हि भारतवर्षभाष्यमाणानां प्रायः सर्वासां देश्यभाषाणां जनयित्री, सर्वविधशब्दार्थकामधेनुस्ताभिः स्वपोषाय, नित्यमपेक्ष्यते च नित्यमुपजीव्यते च कुल्याभिरिव महानदी। देश्यभाषासु खलु नाम परस्परगतविषयविनिमाने विदेशभाषागतनवनवविषयानयने स्वरूपसौष्ठव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साधने च संस्कृतभाषोपयोगो नान्तरीयको हि भवति। देश्यभाषाणामेवं संस्कृतभाषापोष्यत्वसिद्धौ यथा महानदी पोष्यकुल्याक्षेमो महानदी क्षेमाधीनः, तथा संस्कृतपोष्य-देश्यभाषाक्षेमः संस्कृतभाषाक्षेमाधीन इति फलति, तथा च यावद् भारतदेश्यभाषा जीवन्ति, यावत् तद्भाषिणो जीवन्ति, यावच्च श्रौतगृह्यकर्मानुष्ठानं हिन्दूनां जीवति, तावत् संस्कृत-भाषा जीवत्येव। सा मृतेति वचनं 'वयं मृताः' इति वचनवद् व्याहतार्थमेव, यथोक्तमहाफलजननक्षमायास्तस्याः भाषणा-नुपयोगित्वमात्रेण मृतत्वव्यपदेशस्तु पानपाकानुपयोगित्व-मात्रेण सर्वरत्नखनेर्महार्णवस्य मृतत्वोक्तिवदुपहसनीयो वेदितव्यः। तदेवं संस्कृताध्ययनलभ्यानि फलान्येतावन्ति सक्षेपात् प्रतिपादितानि भवन्ति।

उच्चावचशास्त्रावबोधः आर्यमतव्युत्पत्तिः ऐहिकामुष्मि-कधर्मज्ञानम् धर्मसिद्ध्यनुकूलानां कर्मणामिति कर्तव्यताक-बोधः कर्मविनियोज्यमंत्रतदर्थावगमः बुद्धिसंस्कारः संस्कृत-प्रभव देश्यभाषाव्युत्पत्तिसौष्ठवम् पुरावृत्तविमर्शकौशलम् सर्वविधसाहित्यवैचित्र्याह्लादानुभूतिरिति, इयच्च प्रमेयजातं नकाप्यन्यस्यां भाषायां प्रतिपादितमिति सर्वप्रमेयरत्नाकरो नाम संस्कृतम् न च मन्तव्यं यानि संस्कृतवाङ्मयान्मतानि बहून्यधीमहे शैवं वैष्णवं शाक्तमित्यादीनि आत्यन्तिकदुःख-निवृत्तिसाधनानि, तानीश्वरबहुत्वप्रसङ्गादनुपपन्नानीति, यत ईश्वराख्यं सर्वलोकप्रभविष्णुतत्वमेकमेव, तस्यैव रूपभेदकृतः शिवो विष्णुरित्यादिनामभेदः उपासनाभेदश्च यथारुचि परि-प्राह्य इति शास्त्रसिद्धान्तः। तथा च पुष्पदन्तेन भगवत्स्तोत्रे भाषितं—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पश्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥"

इति अतएवास्मन्मतानां कैस्तमहम्मदादिदृष्टैर्मतैरपि न विरोधः, नाम्नां भेदेऽपि नामिन ईश्वरस्यैकत्वात्, तस्य च सर्वविधनामप्रतिपाद्यत्वाभ्युपगमात्, तस्मात् सर्वाकारहृद्यान्यनवद्यान्यस्मन्मतानि ।

ये पुनरस्मच्छास्त्रविहिताः वर्णाश्रमादिगोचरा दृष्टफला अदृष्टफला दृष्टादृष्टफलाश्च बहुरूपाः शय्योत्थानात् प्रभृति आशय्यासंवेशादार्याणां व्यवस्थिता नित्या नैमित्तिका वा, तेऽप्यारोग्यबलपुष्टेः चित्तशुद्धेर्विद्यावृद्धेः परस्परोपकारादिलक्षणसद्गुणपरिवृद्धेश्च सर्वात्मना संसाधका एकान्ततो हिता एव, जातिव्यवस्था नाम निकर्षापकर्षयोर्जन्मसिद्धत्वदुरभिमानं जनयतीति तया कलङ्कितमिवार्यधर्मकलापं यत् केऽपि मन्यन्ते, तन्न युक्तम् । यथा कारुसूनुर्जन्मसिद्धेन कारुत्वजातिमात्रेण शिल्पाभिज्ञ इति नोच्यते, शिल्पकरणलभ्यस्य लाभपूजादेश्च न भाजन भवति, तथैव ब्राह्मणादिसूनुर्ब्राह्मणत्वादिजातिमात्रेण वेदवेदाङ्गादिविज्ञ इति नोच्यते तदुक्तकर्मानुष्ठानलभ्यं च लाभपूजादि न विन्दत इत्येव हि धर्मशास्त्रकाराणामादेशः तत्र यदि यथाजातः कश्चिज्जातिमात्रेणात्मन उत्कर्षापकर्षावभिमन्यमानस्तुष्येद् विषीदेद्वा, तत्र किमपराद्धं जातिव्यवस्थया । यद्येवं, किमर्थं तर्हि कर्मणां जातिसम्बन्धप्रतिनियमः शास्त्रेऽनुशिष्ट इति चेत् जातिसम्बन्धे कर्मणां गुणातिशयो यथा स्यादित्येतदर्थम् । यथा हि शिल्पवृत्तिः शिल्पवृत्तिमत्सन्तानपरम्परामासाद्य सहजशि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्पवासनाबलाद् ज्ञानानुष्ठानयोर्गुणातिशयं परिगृह्णती शोभते, तथा विद्याशौर्याद्याश्रया वृत्तयो लोकयोग्यता क्षेमापेक्षितास्तद्-वृत्तिमत्सन्तानरूपरां सहजतत्तद्वासनावतीमाश्रित्य सौष्ठवं प्रतिपत्स्यन्ते । मनुष्याणां हि अवर्जनीयाश्चतस्रो वृत्तयो भवन्ति—विद्यावृत्तिः, शूरवृत्तिः, अर्यवृत्तिः, शुश्रूषावृत्तिरिति, लोकतत्त्वस्य साङ्गोपाङ्गवेदतत्त्वस्य च ज्ञान विद्या, तदनुसारिणी वृत्तिः विद्यावृत्तिरित्युच्यते । सर्वोपायैः शत्रुनिग्रहः शूरवृत्तिः । वाणिज्यं कृषिः पशुपालनं चार्यवृत्तिः । परिचरणं शुश्रूषावृत्तिः । जनानां योगक्षेम एतास्वेव चतसृषु वृत्तिष्वायतते इत्यासां सौष्ठवमवश्यमेष्टव्यम् । तत्सौष्ठवाभ्युपायेषु च मुख्यश्चातुर्वर्ण्यनियमः । अतो यथोक्तवृत्त्याश्रयाश्चतस्रो जातयः स्वरसत एव सिद्धा वेदितव्याः । तथा च भारतमाह—

"ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम्" "इति । चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागतः" इति च । स चायं वर्णभेदः पूजाभेदस्य हेतुरपि सन् वर्णानां मिथः कलहमीर्ष्यां वा पुरा न जनयामास । यथा चत्वारो भ्रातरः कुटुम्बव्यापारान् विभज्य नियमेनानुतिष्ठन्तस्तेषु तत्फले च समष्टिभोग्ये गुणातिशयमादधते, तादृगेषा चातुर्वर्ण्यव्यवस्थेति चतुर्भिर्वर्णैः परस्मिन् भ्रातृबुद्धिर्नाम कृताभवत् एकावयविसमवायिभिन्नकर्माणश्चत्वारो वयमवयवा इति च तेषां मतिरभवत् । एवञ्च मन्वानास्तां तां वृत्तिं प्रति स स वर्ण आहोपुरुषिकामर्हन् न प्रकर्षमात्मनि वर्णान्तरापेक्षमभ्यमन्यत । तेन जनसमुदायस्य स्वास्थ्यं तृप्तिः सुखं च वर्णधर्मैरुपचितं बभूव ।

यत्तु केचिद् ब्राह्मणानां स्वार्थपरतामेव जातिव्यवस्थायां हेतुमूहन्ते, ऊहस्थानानि च दर्शयन्ति—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'ब्राह्मणो वै सर्वा देवताः'
ब्राह्मणे प्रीते जगदीश्वरः प्रीतो भवति।
अपराधे महत्यपि ब्राह्मणस्य देहदण्डाभावः।
अध्यापनं याजनं प्रतिग्रहश्चेति वृत्तयो ब्राह्मणस्यैवार्हाः।

इति तदसारं, यतो ऽरत्तमा ब्राह्मणा न स्वार्थपरा आसन्, ते हि प्रकृत्या नरभोगान् नातीव चकमिरे। शान्त्या दान्त्या युक्ताः सन्तो वनेषु वनकल्पेषु ग्रामेषु च वसन्तः सुलभैर्मिताहारैः सन्तृप्ता ईश्वरोपासनया तीर्थयात्रया नवनवतत्त्वदर्शनेन च ते कालं निन्युः। राज्ञा ते काले काले समाहूताः राज्यकार्य-सम्मन्त्रणं पौरोहित्यं चाचेरुः। अतस्तेभ्यः सम्पद्यमानानुपकारान् स्मरद्भिः सर्वैर्वर्णैर्ब्राह्मणजातये पूर्वोक्तोऽसाधारणो बहुमानः प्रीतिदाय उपकल्पित इति युक्तमुत्पश्यामः।

तस्मिन्नपि प्रीतिदायेऽस्मत्पूर्वब्राह्मणानामास्था नैवासीत्, अतएव ते धनार्थं याजनमध्यापनं च निनिन्दुः, प्रतिग्रहं च पातकहेतुमुद्घोषन्ति स्म। मनुरप्याह—

"सम्मानाद् ब्राह्मणोनित्यमुद्विजेत विषादिव।
अमृतस्येवचाकाङ्क्षेदवमानस्य सर्वदा।" इति।

अवश्यं च विश्वामित्रोपाख्यानं परशुरामचरितं चात्र विषये स्मरणमर्हतः। विश्वामित्रो हि ब्राह्मणत्वाय न धनतृष्णां स्वीकृतवान्, प्रत्युत राज्यभोगान् वर्जितवान्। परशुरामश्च सकलक्षत्रियजयेनार्जितमपि राज्यं परित्यज्याश्रमवासिनामुचितां स्वजातिवृत्तिं भेजे। 'ब्राह्मणो वै सर्वा देवता' इति चार्थवादः। गुणभूयिष्ठो जनो माननीय इत्येतावति चार्थे तस्य तात्पर्यम्। तदेवं जातिव्यवस्था हिन्दु धर्मकलापस्य न कलङ्कः किन्तु भूषणमिति स्थितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदपि केचिदाहुः स्त्रीषु सदयाः प्रतिपत्तयो हिन्दूनां न सन्ति, ता हि स्वातन्त्र्येण न योज्यन्ते न विद्यासु परिश्रम्यन्ते। स एष समुदाचारो हिन्दुधर्मकलापस्य शोभां विहन्तीति। तदपि न साधु, यतो मानुषोद्देश्येषु पित्र्युद्देश्येषु देवोद्देश्येषु च कर्मसु स्त्रियाः स्वातन्त्र्यं पुरुषादविशिष्टम्। द्रव्यस्य स्वेच्छया प्रदाने प्रभविष्णुत्वं नाम यत् स्वातन्त्र्य तदपि द्रव्यावशेषे स्त्रियाः पुंसा समानम्। अपि च, अन्नादिदाने स्वातन्त्र्यं स्त्रिया एव न पुंसः। अतएव 'भवति भिक्षां देहि' इति दातृसम्बोधनपदं स्त्रीलिङ्गं धर्मशास्त्रकारैरनुशिष्टम्। ज्योतिष्टोमादौ यज्ञे पुंसः पत्न्यभावे नैवाधिकार इति पश्यत स्त्रीणां प्राधान्यम्। विद्याभ्यासोऽपि तावत् स्त्रीणामनुमत एव शास्त्रेषु, किन्तु वेदादन्यत्र तासामधिकारः। 'न स्त्री शूद्रौ वेदमधीयाताम्' 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा। इति भारतमाख्यानं कृपया कृतवान् मुनिः' इत्यादिवचनात्, किन्तु भूरिग्रन्थसन्दर्भचिरपठनपरिश्रमाधिगतमैहिकामुष्मिकवस्तुतत्त्वविषयमात्मनो विज्ञानपुरुषा अबलाभ्यो गर्भग्रहणधारणादिक्लेशचक्रकविधेयाभ्यः प्रायः पुस्तकपठनक्लेशमददाना एव सन्तो वितरन्ति, यथा स्त्रियः पुरुषेभ्यः पाकश्रममददाना एव स्वप्रयत्नसाधितमन्नं पुरुषेभ्यो वितरन्ति तद्वत् एषा रीतिः हिन्दुभिः स्त्रीषु दयमानैः प्रायेणानुसृता दृश्यत इतिसर्वथैव निर्दोषो हिन्दुधर्मकलापः।

तस्यैतस्य सर्वाकाररमणीयस्यास्मन्मतधर्मकलापस्य प्रतिपादिका संस्कृतविद्यास्मत्पूर्वपुरुषैरत्यन्तमादृता बभूव।

पुरा खलु माणवका वेदमधीत्य काव्येषु च समीचीं व्युत्पत्तिमासाद्य शास्त्राणि तत्तत्वैकदेशस्यानपहानेन स्माधीयते, तथा शास्त्रसंस्कृतां बुद्धिं धर्मशास्त्रेष्वितिहासादिषु च नियमेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ते चारयांबभूवुः । अनया शिक्षाप्रक्रियया बहुषु प्रमेयेषु सातिशयमेकत्र वा तथाभूतं सर्वपथीनं ज्ञानमधिजग्मुः । विद्याविज्ञानेन लोकविज्ञानं, लोकविज्ञानेन च विद्याविज्ञानं परं प्रकर्षमेषां गमितमासीत् त एत एव लोकशास्त्रनदीष्णाः, पण्डिताः भूत्वा स्मार्तधर्मादस्खलन्तः, शिष्योपदेशनैर्व्याख्यानिबन्धनिर्माणैर्गृहतन्त्रादिराज्यतन्त्रान्तकार्यनिर्वहणैश्च स्निग्धोदारचतुररमणीयैः सर्वतोमुखमुपकुर्वन्तो लोकस्य स्वात्मपाण्डित्यं चरितार्थं चक्रिरे। तादृगसौ पण्डितिमा संस्कृतशिक्षा च तदनुगुणा सहस्राणि बहूनि पुरा परिवत्सरान् जरत्तरार्येषु स्वधर्मानुपालनश्रद्धालुषु अस्खलितं चखेलतुः । अद्यत्वे तावन्नास्तिकल्पौसमपद्येताम् । तयोर्हि मूलं स्वधर्मानुपालनश्रद्धालुता चिरस्य हिन्दूभूयिष्ठमपहाय पलायिता ।

तत्र किं कारणं स्यात् । स्वधर्माणां सामान्यतो विशेषतश्चापरिज्ञानं, बाल्ये तदनुष्ठानापरिशीलनंचेति ब्रूमः । हिन्दवो ह्यधुना वर्षयुगेषु राजकीयकार्यालयवृत्तीरेव परिमिताः परमपुरुषार्थतयबुद्ध्या कामयमाना वृत्त्यन्तराण्यवधीर्य गड्डलिकाप्रवाहन्यायेन सङ्क्रशो बालान् आपञ्चमाद्वयस आङ्गलभाषापाठालयं प्रायः प्रवेशयन्तो दृश्यन्ते । बालाश्च प्रायेण तामेवैकतानेन मनसाधीयानाः कृत्स्नं विद्याभ्यासकालं नयन्ति, परिसमाप्तविद्याश्च कथञ्चिदोप्सितवृत्त्यलाभादसन्तुष्टा भवन्ति । न तु स्वदेशभाषां संस्कृतं वा यथापेक्ष्यमध्येतुं स्वधर्मपरिज्ञानानुष्ठानादिसमवेक्षितुं वावसर लभन्ते । स्वधर्माश्च संस्कृतग्रन्थेषु कतिपये तु देश्यभाषाग्रन्थेषूपदिष्टाः । तत् कुत एतेषु प्रौढं वयसि स्वधर्मानुपालनं श्रद्धालुता नाम सम्भवतु । प्रत्युत स्वधर्मानुष्ठानगुणमजानन्त एते बाल्यसिद्धविमतविधर्मसच्छात्रसंस्तवोपाहितसंस्कारबुद्धितया स्वध-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्मानुष्ठातॄन् न केवलं, किन्तु धर्मशास्त्रकारानप्यवहेडमानाः स्वमतधर्मान् संस्कर्त्तुमपि संरभन्ते । अर्थकरविद्याविभवसम्पन्नमानिभिरीदृशैः स्वधर्मेष्वेवमवज्ञायमानेषु विरलास्तत्रतत्र सन्तोऽपि संस्कृतपण्डिता देश्यभाषापण्डिता वा धर्मशास्त्रादिशमेव प्रायशोऽनवलोकमानाः परस्यात्मनो वा नोपकारक्षमा भवन्ति ।

आङ्गलसाम्राज्येन खलु नाम सकलमतधर्मरक्षणानुकूलया रीत्या राज्ये साधुतन्त्र्यमाणे, जनेषु चान्यान्यजातिभवेषु स्वधर्मानुपालनश्रद्धां सफलां सर्वात्मना भजमानेषु तां हिन्दवः शिथिलयन्तीत्यतोऽधिकं किमस्ति नः शोकस्य विस्मयस्य व्रीडस्य वा स्थानम् । जनो नाम मनोवाक्कायानां सङ्घातः स एतेषु जीवत्सु जीवति इति व्यपदेष्टुमर्हः । तत्र मनसो जीवितं स्वमतं, यस्मिन्नीश्वरविश्वासः सर्वव्यतिक्रमाङ्कुशोऽधीनः, वाचो जीवितं स्वभाषा नाम, यस्याम् इहामुत्रयात्रानुबन्धिनो व्यवहारा आयत्ताः कायस्य जीवितं वाङ्मनसचोदितानां धर्माणामनुष्ठानं नाम तैरेतैर्जीवितैर्यदि मनोवाक्कायान् विषयोज्जयाम, प्राणिम इत्यभिमानस्य कथं वयं पात्रं भवेम, कथं चास्मासु आत्मोपधर्मावज्ञायिषु स्वमतस्वभाषास्वधर्मपरायणा अहिन्दवो विश्वस्युरिति निपुणं विचारणीयं विद्वद्भिः । देश्यभाषायामप्येवं पाण्डित्ये दुर्लभे किमु वक्तव्यं संस्कृतभाषायाम् ।

अपि च, यथोक्तसंस्कृतशिक्षापण्डितिम्नोः सुष्ठु प्रतिष्ठा यस्याम् आयतते, सा किल राजपूजा नाम कृशायितचरी नेदानीमस्ति । यथाप्यार्यबीजप्रभवत्वप्रभावादनाद्यविद्याविद्यासनेव संस्कृतश्रद्धावासना काचिदद्यापि लेशतो हिन्दुषु तैरप्यविदिता तिष्ठति, यद्वशात् स्वधर्मस्तैः कृत्स्नो न त्यक्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथैव संस्कृतादरवासना कापि राजसु प्रभुषु न लेशतो लक्ष्यते, यया ते संस्कृतज्ञान् सम्भावयन्त्येव किञ्चित् तस्यास्य श्रद्धालवस्य सम्भावनालेशस्य वा चोदना कियन्मात्रमिव संस्कृते पाण्डित्यं प्रकर्षयेत् ।

किञ्च हिन्दूनां सहजादालस्याद् धर्मावज्ञानप्रभवात् संस्कृतावज्ञानाच्चासङ्ख्यानि ग्रन्थरत्नानि प्रणाश गतान्यासन् ।

अस्यामपि दुरवस्थायां संस्कृताध्ययनं भारतेऽन्यक्षणे यन्न नष्टं, किन्तु क्वचित् क्वचिदात्मलाभं कमप्यासादयदुपलभ्यते, सोऽयमस्मच्चक्रवर्त्तिसाम्राज्यस्यैव स्वप्रजासु कृपावतःप्रसादः। आङ्गलसाम्राज्यशासनेन हि अनेकानि भारते संस्कृतविद्यामन्दिराणि, परीक्षोत्तीर्णानामाचार्याद्युपाधिदानं, पण्डितप्रवराणां महामहोपाध्यायविरुदेन सम्भावना च परिकल्पितानि ? वि. ए. एम., ए. परीक्षयोः शास्त्रग्रन्था अनेके प्राधान्येनाध्येतव्यतया व्यवस्थापिताः । तथा नष्टावशिष्टाः संस्कृतग्रन्थाः परमैयत्नैः सङ्गृह्यन्ते किञ्चित् प्रकाश्यन्ते च, अयं चापरः संस्कृताध्ययनस्य चोदकमनुमतमस्ति,यद्गुणग्राहिणो यौरोपाः संस्कृतविद्यामधीत्य तद्गतान् गुणविशेषाद् निबन्धैः प्रकाशयन्ति, यत्परिशीलनेन केचिज्जनितरुचयः संस्कृतमध्येतुं यतेरन्। अपि च भारतीयैरेव कैश्चिन्महाराजैः प्रभुभिश्च पुण्ययशस्कामैः संस्कृतविद्यामन्दिराणि स्थापितानि सन्ति । किन्तु अध्याप्यजनसंख्यायाः संस्कृतगतानां प्रमेयानां बाहुल्यगौरवयोश्च गणनायाम् एतावता संस्कृताध्ययनस्य हस्तावलम्बः पर्याप्तः सिद्ध इति न शक्यते वक्तुं, यदर्थमयमस्मत् सभायाः समारम्भः । अतस्तस्य समुचितहस्तावलम्बसिद्धयेऽभ्युपाया इमे भवितुमर्हन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१—संस्कृतविद्यामन्दिरमेकैकं जनपदे जनपदे कल्पनीयम्

२—धर्मद्रव्योपजीविनः संस्कृतपाठालया यावन्तो विद्यन्ते, ते महापाठालयत्वं नेतव्याः ।

३—आद्यदेवालयेषु जनसमुदायाधीनेषु, राजशासनचिन्त्यमानयोगक्षेमेषु च पूजकादीनां कैङ्कर्यकराणां स्ववृत्त्यपेक्षितवैदुष्यसिद्धये देवालयद्रव्यमुपजोव्य संस्कृतविद्यामन्दिराणि नवनवानि स्थापनीयानि ।

४—सर्वे वर्णा अविशेषेण विद्यामन्दिरेष्वध्याप्याः ते हि प्रकृत्या भ्रातर इत्यवोचाम ।

५—प्राचामपूर्वग्रन्थानां नश्यदवस्थानां संग्रहणप्रकाशनयोस्त्वरिततरा यत्नाः कर्तव्याः । प्रकाशितानामपि भारतादीनां प्राचीनतरबह्वादर्शग्रन्थसम्पादनेन तद्गतप्रमेयतत्त्वविमर्शनपरविपुलोपोद्घातसचिवतासम्पादनेन च पुनःप्रकाशनं कर्तव्यम् ।

६—देश्यभाषाध्ययनस्याभिवर्धनीयतां संस्कृताध्ययनसापेक्षतां च प्राङ्न्यरूपयाम । तस्याभिवृद्धये भारते सर्वत्र रीत्यन्तरमुल्लेख्यम् । अर्थात् पञ्चमाद्वयसः प्रभति आद्वादशाद्देश्यभाषामधीतवन्त एव बाला आङ्गलीपाठालयेषु प्रवेशनीया इति नियमः कल्प्यः ।

७—कालानुगुणभोग्यवस्तुनिर्माणविद्या अन्याश्च सर्वजनोनाः कलाः देश्यभाषासु आनेतव्याः ।

८—वेदार्षग्रन्थाद्याधारेण भारतीयपुरावृत्तान्यूहितानि परीक्षितु नवानि सम्यगूहितु च तथा पण्डिताः प्रभवेयुः, छात्रा वा शिक्ष्यमाणास्तदनुगुणं पाडित्यं विन्देयुः, यथा तर्कव्याकरणादिशास्त्रनवीनग्रन्थकोणगताक्षेपसमाधाननिचयरोम-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्थनधन्यमानिनःशुष्कान्योन्यवाक्कलहकामुका न भवेयुः तथा ते शिक्षणीयाः।

९—यच्च, यावच्च प्रमेयजातं संस्कृतवाङ्मयेन कटाक्षितमस्ति, तत् सर्वं विभज्य तत्तच्छात्रेषु यथाधिकारं प्रचारयितव्यं सर्वेषु विद्यामन्दिरेषु। भूमिशास्त्रं लोकचरितं साहित्यं धर्मशास्त्रम् इतिहास इत्येतस्मिन् प्रमेयजाते नियोगतश्छात्रा व्युत्पाद्याः।

१०—छात्रा अवरतो द्वादशवर्षाण्यध्याप्याः। तत्र पूर्वस्मिन् वर्षषट्के प्रत्यहं मुहूर्तमेकं देश्यभाषाम् अध्याप्याः उत्तरस्मिन् मुहूर्त्तमेकमाङ्गलभाषाम् अध्याप्याः।

११—छात्राः शास्त्रेषु प्राचीनान् ग्रन्थान् नियमेनाध्याप्याः।

कः पुनरर्वाचां ग्रन्थानां च मिथो विशेष इति चेद्? उच्यते। प्राक्षु तावद् ग्रन्थेषु शोभनमनस्संस्कारविधायिनोऽवश्यवेद्यस्य प्रमेयजातस्य लोकव्यवहारसामरस्येन प्रतिपादनमस्ति, क्षोदक्षमनवप्रतिपाद्यबहुलानां च सौशब्द्यादिगुणयोगिनां राजमार्गाणामिव वाक्यानां सचमत्कारादारा कापि सन्निवेशशैली, यद्वशात् तदध्यायी तच्छास्त्रतत्त्वेष्वखिलेषु व्युत्पद्यते, लोकव्यवहारेषु साग्मुख्यं भजति, लब्धसंस्कृतव्युत्पत्तिवैचित्र्यविशुद्धबुद्धितया च धर्मशास्त्रेतिहासादिकमास्थापूर्वमक्लेशादवगच्छति।

अर्वाञ्चस्तु ग्रन्था न तादृशा लक्ष्यन्ते, यद्यपि तेषु केषुचित् प्राग्ग्रन्थव्युत्पन्नबुद्धिभिरेव पण्डितैर्निर्वचनीयकतिपयार्थनिर्वचनोद्देशं पुरस्कृत्य प्रणीतेष्वस्ति प्राचीनच्छायानुविधानं तथाप्यर्वाचीनतरैर्बहुभिर्नवनवमहार्थोल्लेखनशालीनैः स्वपाण्डित्यप्रकटनलालसया वादकेलिकुतुकितया च कृतास्तद्व्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ख्योपव्याख्या अध्येतॄणां न गुणाय कल्पन्ते, न तावदद्यत्वे प्रचरद्भ्य एवज्ञातीयकग्रन्थेभ्यस्तच्छास्त्रतत्त्वमपि न्यक्षेणाधिगन्तुं शक्यम्, एतैर्हि तत्त्वैकदेशविवेचनप्रवृत्तैर्लोभान्तस्सारपरीक्षणभङ्ग्या, लोकबुद्ध्यकाम्यक्षुद्रक्षुद्रार्थगवेषणपरैरप्रयोजनके वादकौतुकमात्रप्रयोजनके वावकरप्रायक्षुद्राक्षेपसमाधाननिकेचाये कुकाव्यैरिव वर्णविन्दुमात्राच्युतकानुप्रासादिक्रोडीकरणे विश्रान्तम् । अल्पार्थकबहुलशुष्कवाक्यजालावृत्तिसमुच्छूनाश्चैते खाध्येतॄणां समयमवश्यवेद्यविषयान्तरोपयोज्यमपहरन्तस्तथाविधेषु विषयेषु रुचिं प्रतिरुन्धन्ति, निष्फलयन्ति च ।

किञ्च, संस्कृतभाषाव्युत्पत्तिरर्वाग्ग्रन्थरतीनामदूढा, प्रसन्नगम्भीरेष्वार्षग्रन्थेषु प्राक्कविकृतिषु च व्यासङ्गाभावात् अत एव तत्तद्वस्तुसूक्ष्मसूक्ष्मभावानुसन्धानविमुखमरसिकमर्वाचां चेतः । तद्धि कविसमयसिद्धालौकिकार्थोपजीविनीषु दीप्तदीर्घपदजालोद्गीर्णासु अभित्तिचित्ररचनासखीषु आपातरमणीयासु अर्वाचीनकृतिप्राणनाडीषु कल्पनासु तात्पर्येण व्युत्पन्नमसदर्थोल्लेखेषु रमते, न तु मधुरसुकुमारपदोपपादिते वस्तुसूक्ष्मस्वभाववर्णने । किमतोऽर्वाचीनग्रन्थाः सर्वथा नोपादेया इति मन्यते ? न, किन्तु प्राञ्चः प्रशस्ता ग्रन्थाः प्राधान्येन परिशीलनीयाः, तदविरोधेन तु कदाचित्कार्यविवादद्यूतायार्वाञ्च इति ।

१२—अनया शिक्षाप्रक्रियया पाठालयैः प्रसूतानां पण्डितानां के जीविकाभ्युपाया इति महान् यः प्रश्नोऽस्ति, तस्याप्युत्तरमीषत्करं—पाठालयेष्वेव ते भूयिष्ठाः प्रवक्तृस्थानेऽधिकरिष्यन्तीति । अपि चैतैर्मतधर्माचारनिष्णाततयोपकार-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षमैर्हिन्दुजनवर्गाः सर्वे तदुपकारार्थिनः कृतोपकारा अवश्यं भवेयुरित्युपकारफलं धनबहुमानादिलाभरूपं पण्डितानां सुलभमेव भविष्यति, राजशासनकर्मकराणामपि हि स्वमतधर्मानुरागो वासनात्मना हृदि स्थितः सर्वत इदानीम् उन्निद्र इव लक्ष्यते, तैः स्वमतधर्मानुष्ठानेऽपि यावच्छक्ति यत्नः क्रियमाणो महते फलाय कल्पिष्यते । तेन हि तेषामात्मानुग्रहो न केवलं, तदीयमाचारं प्रमाणयतामन्येषां सदाचारशिक्षणमपि सिद्धं भवति । तदनुष्ठानसौकर्यं तेषामाधिकारिकैर्व्यापारैर्वि हन्यत इति त्वलसवादः । यतो महाराज्यतन्त्रव्यापृतानपि स्वमतधर्मानुष्ठानं सम्यङ्निर्वाहयतः प्रभूनुपलभामहे । तत्रैकमुदाहरणं अनन्तशयनराज्याधिपतिर्महामहिमा श्रीरामराजः स हि कुलशेखरकिरीटपतिः पद्मनाभदासव्यपदेशं स्ववंशभूषणं वहन् राज्यतन्त्रविद्याब्धिपारगो राज्यकर्मसु अतिनिपुणं नित्यं व्याप्रियते, नित्यनैमित्तिकान् स्वमतधर्मांश्च सम्यगनुतिष्ठति । एवमन्येऽप्युदाहरणार्हा उपलभ्यन्त एव । राज्यमन्त्रणेऽप्येवं जातिधर्माविरोधेन सुकरे परिदृश्यमाने तद्व्याप्यान् व्यापारान् प्रति किमु वक्तव्यम् । ननु च स्वधर्माः शास्त्रेषु बहुप्रकाराः प्रकीर्तिताः तान् अद्यत्वे कात्स्न्र्येन कोऽनुष्ठातुं प्रभवेत् । सत्यम् । न खलु वयं ब्रूमः 'शास्त्राणां पारं गत्वा महाक्रतुषु नित्यं द्विजैर्दीक्षितव्यं पञ्चाग्निमध्ये वा तप्तव्यम्' इति किन्तु नित्यनैमित्तिककर्माणि तद्विनियुक्तमन्त्रतात्पर्यज्ञानपूर्वं श्रद्धया यथाकालं विधिवदनुष्ठेयानीति ईषदपि हि सत्यां श्रद्धायाम् अस्य कर्मकलापस्यानुष्ठानं दास्यरूपा तदन्यरूपावानजातु काचिद्दशो परोद्धुं शक्ष्यति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१३. राजकीयेषु लेख्यप्रमाणीकरणकार्यालयेषु अन्येषु च तथाविधेषु साधारणेभ्यः संस्कृताविज्ञेभ्यः कर्मकरत्वं राजकीयैर्देयम्।

१४. इदं तु मूर्धाभिषिक्तं बालानां संस्कृताध्ययने प्ररोचकं, पण्डितानां शास्त्रीयसूक्ष्मसूक्ष्मवस्तुविमर्शगवेषणयोर्महोत्साहकरं च, यथोक्तं जातोयपरश्शतसंस्कृतविद्यामन्दिरसाध्यप्रयोजनं जननक्षमं च यद् एककुटुम्बपोषणपर्याप्तधनमितानि अर्थाद्रूप्यसप्ताष्टसहस्रन्यूनानि दशपारितोषिकानि दशसु विषयेषु क्षोदक्षमेषु सन्निबन्धविधायिभ्योऽन्यान्येभ्यः पण्डितेभ्यः प्रतिवर्षं प्रदायेरन्। पारितोषिकदशकार्थे हि शताधिकेषु पण्डितेषु स्वयमहमहमिकया समीहमानेषु विमर्शनिबन्धविधाननिपुणाः कतिकति प्रतिवर्षं सुलभा न भविष्यन्ति।

भो विद्वद्वरेण्याः सभासदः त एतेऽभ्युपाया अन्ये च प्रशस्ततराः संस्कृतसाहित्यसम्मेलनसंस्थयैवैतया साधयितुमर्हाः। सर्वथैवास्माद्धितविधायिनि अस्मच्चक्रवर्तिसाम्राज्ये सुप्रसन्ने, मण्डलेश्वरेषु महाराजेषु अन्येषु च महाधनिकेषु कल्याणाभिनिवेशिषु विद्यमानेषु, महामहोपाध्याय श्रीगङ्गानाथोपाध्यायमहोदयमुख्येषु च प्रयत्नमार्गोपदेशसमुद्यतेषु, कार्यकारिसमितौ च कार्याणि निपुणं चिन्तयन्त्यां, भूरिवित्तसापेक्षा अप्येतेऽभ्युपायाः सुसाध्या एवेति मे मतिः। अपि चेदानीं समुत्फुल्लेषु मान्यानां सभासदां मुखकमलेषु प्रकाशमानो महोत्साहः कार्याणां सिद्धिमदूरवर्तिनीमिव स्पष्टं शंसति। अवश्यमस्माभिरश्रान्तैः सम्यक् क्रियमाणाः प्रयत्नाः फलमिष्टं दर्शयिष्यन्ति। यथाह—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"काष्ठादग्निर्जायते मथ्यमानाद्
भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयत्नाः फलन्ति ॥" इति ।

सर्वथैवास्याः संस्कृतसाहित्यसम्मेलनसंस्थायाः समुद्यमो भगवतोः श्रीविश्वेश्वरत्रिवेणीमाधवयोः कृपामहिम्ना सुफलसमृद्धा भवत्वित्याशासे ॥ इति शिवम् ॥

त. गणपतिशास्त्री

वक्तृताया अतिविस्तृतत्वाद् यद्यपि सामाजिकैर्नैरन्तर्येणावधानदानं दुष्करमासीत्, तथापि तस्यां प्रतिपदंस्फुटीभवतः सभापतिमहोदयस्य प्रकाण्डपाण्डित्यस्य विषये सर्वेषामपि साधुवादाः संप्रवृत्ताः । समाप्तायां सभापतिवक्तृतायां श्रीसीतारामशास्त्रिणा सहानुभूतिसूचकानि नानादेशागतानि विद्युद्वृत्तानि पत्राणि च श्रावितानि । ततः संमेलनस्य मन्त्रिणा श्रीगिरिधराचार्येण चतुर्थवर्षीयं कार्यविवरणं पञ्चमाब्दस्यायव्ययगणना च श्राविते । एम. ए. श्रीकाशीराममहोदयैरनुमोदितं श्रीशालग्रामशास्त्रिभिः समर्थितं सर्वसमत्या स्वीकृतं चैतद्द्वयमपि । ततो विषयनिर्वाचकसमितेः सदस्यानां नामसङ्ग्रहारम्भोऽभवत् । सम्पन्ने तु नामसङ्ग्रहकार्येऽलवरराज्यशिक्षाविभागाध्यक्षैः श्रीरामभद्र एम. ए. एल. एल. बी. महोदयैः परममाननीयानां श्रीमदनमोहनमालवीयमहोदयानां संदेशः श्रावितः । तद्यथा-"द्वितीये दिने संमेलनं त्रिवेणीतटे श्रीसनातनधर्ममहासभाया मण्डप एव भवेद्, येन सुबहूनां लोकानामुपकारः सम्पद्येत इत्यहं सानुनयं प्रार्थये" इति । एतस्य निमन्त्रणस्य स्वीकारास्वीकारविषये सभ्यानां सम्मतिः प्रष्टव्येति सभापतिनाज्ञप्ते मन्त्रिणा श्रीगिरिधरशर्मचतुर्वेदेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निमन्त्रणस्वीकारास्वीकारविषये स्वागतकारिण्या अधिकारिण एव प्रभवन्तीति निवेदिते स्वागतकारिण्याः सभापतिना सभ्येच्छानुसारं कर्त्तव्यमिति स्वमते प्रकाशिते च श्रीमालवीयमहोदयानां सेवायां निमन्त्रणानुग्रहार्थं धन्यवादान् समर्प्य "संमेलनं श्वोऽपि मेयोहालभवन एव भवितेति" सभ्यैर्निणयः कृतः। एतावति कार्यकलाप एव भूयसोऽनेहसो व्यतिक्रान्तत्वादद्य सभाविसर्जनं कृतम्।

ततो विषयनिर्वाचकसमितेः सभ्यैरेकत्रीभूय द्वितीयदिनार्थं कार्यक्रमो निर्धारितः।

माघशुक्ला द्वितीया सं० १९७४

अद्यापि द्विवादनसमय एवाभवत् संमेलनकार्यारम्भः। सर्वतः प्रथमं भारतचक्रवर्त्तिनः श्रीपञ्चमजार्जमहोदयस्य, वर्त्तमाने सर्वजगदुद्वेजके भीषणे युरोपीयसंग्रामे विजयलाभार्थं सभापतिमहोदयेन प्रस्ताव उपस्थपितः, सर्वैः सामाजिकैः करतलध्वनिनाऽनुमोदितः स्वीकृतश्च। ततः सर्वलोकवन्द्यानां श्रीशिवकुमारशास्त्रिणाम्, आहिताग्निश्रीशिवनारायणशर्मणां, साहित्याचार्यश्रीगङ्गाप्रसादशर्म्मणां, लवपुरीय-प्राच्यविद्यालयाध्यापकश्रीदुर्गादत्तशास्त्रिणाम्, जयपुरस्थ-राजवैद्य—कविवर-श्रीगङ्गाधरभट्टानाञ्च मृत्युविषयकः शोकः प्रथमं सभापतिना ततोऽन्यैश्चानेकैः सभ्यैः प्रकाशितः। एतद्विषयको द्वितीयः प्रस्तावश्च स्वीकृतः। ततो वर्त्तमानसंस्कृतशिक्षणशैली संशोधनविषयकस्तृतीयः प्रस्तावो जयपुरवास्तव्यैः श्रीसूर्यनारायणाचार्यमहोदयैरुपस्थापितो बरेलीवास्तव्यैः साहित्याचार्यश्रीशालग्रामशास्त्रिभिरनुमोदितो विद्वद्वरेण्यैः शारदासम्पादकैः श्रीचन्द्रशेखरशास्त्रिभिः समर्थितः सर्वसम्मत्या स्वीकृतश्च। ततः संमेलनार्थंद्रव्यसंग्रहप्रबन्धविषयकश्चतुर्थः प्रस्तावः प्रयागस्थैः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीसीतारामशास्त्रिभिः प्रस्तुतः श्रीगिरिधरशर्मचतुर्वेदैरनुमोदितः श्री अमृतरामनारायणशास्त्रिभिर्वटोदरराजपण्डितैः समर्थितः सर्वसमत्या स्वीकृतश्च। ततः पञ्चमः प्रस्तावः, अध्यापनकलाविद्यालये (Training College) संस्कृतज्ञानामपि प्रवेशानुमननाय पञ्जापविश्वविद्यालयाध्यक्षाः प्रार्थनीया इति विषयकः श्रीगिरिधरशर्मचतुर्वेदैरुपस्थापित ऋषिकुलस्नातकेन श्रीपरमेश्वरानन्दशास्त्रिणाऽनुमोदितः। न केवलं पञ्जापविश्वविद्यालयाध्यक्षा एव, अपि तु भारतीयसर्वविश्वविद्यालयाध्यक्षा एवंविधव्यवस्थार्थं प्रार्थनीया इति सर्वसम्मत्या प्रस्तावे निवेशितम्। प्रस्तावश्च सर्वसम्मत्या स्वीकृतः। ततः षष्ठः प्रस्तावः संस्कृतज्ञैरप्याङ्गलभाषाऽवश्यमध्येतव्या, पञ्जापविश्वविद्यालयवत् प्रयागीयविश्वविद्यालयेऽपि लब्धशास्त्रिपदवीकेभ्यश्छात्रेभ्यः केवलमाङ्गलभाषा परीक्षोत्तरणमात्रेण बी. ए. पदवीप्रदातव्येति विषयको लाहोरवास्तव्यैः श्रीगणेशदत्तशास्त्रिमहोदयैरुपस्थापितः श्रीकृष्णमाचार्यैरनुमोदितश्च। परमत्र विषयेऽनेकैर्विद्वद्भिरुपदर्शिता बह्वीर्विप्रतिपत्तीः संभाव्य स्थगित एवैष बहुसंमत्या।

सप्तमः प्रस्तावः काशोत्थदरभङ्गापाठशालायां दरभङ्गाधिपतिभिः पूर्वं दीयमानसाहाय्यं सम्प्रति निरुद्धमिति तद्विषये संमेलनमिदंखेदं प्रकाश्य भूयोऽपि साहाय्यप्रदानानुग्रहार्थं दरभङ्गाधिपतीन् श्रीरमेश्वरसिंहमहोदयान् प्रार्थयते। निराश्रयायास्तस्याः पाठशालायाः साहाय्यदानमचिरात् प्रारब्धवद्भ्यः श्रीमूलचन्द्रश्रेष्ठिमहोदयेभ्यः सम्मेलनमिदं कृतज्ञताप्रदर्शनपुरस्सरं धन्यवादान् वितरति, इति स्वरूपः प्रयागस्थश्रीनारायणदत्तशास्त्रिभिरुपस्थापितः श्रीगिरिधरशर्मचतुर्वेदैरनुमोदितः श्रीशालग्रामशास्त्रिभिः समर्थितश्च सर्वसम्मत्यास्वीकृतआसीत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततःसम्मेलनस्य कार्यकारिण्याः स्थायिन्याः समितेः सभ्यानां नामानि श्रावितानि, सर्वानुमत्या स्वीकृतानि च। तदनन्तरं सर्वसम्मत्या स्थायिनः सभापतेरनावश्यतामङ्गीकृत्य सम्मेलनाधिवेशनसभापतिरेव वर्षपर्यन्तं सभापतिर्भवेदिति सर्वसम्मत्या नियमः कृतः। कार्यकारिण्याः सभापतिश्च जयपुरस्थराजगुरुः श्रीचन्द्रदत्तशर्म्मा मैथिलो व्याकारणाचार्यो व्यवस्थापितः। श्रीगिरिधरशर्म्मा चतुर्वेदी मन्त्री पूर्ववत्। श्री सूर्यनारायणशर्म्मा, श्रीहरिहरस्वरूपशास्त्री च सहकारिणौ मन्त्रिणौ पूर्ववत्। ततः सर्वसम्मत्या निबन्धमुद्रणायैका समितिर्व्यवस्थापिता। विद्वद्वरैरेतेषु श्रीचन्द्रशेखरकामहोदयेषु च विशिष्य निबन्धमुद्रणप्रबन्धभारो विन्यस्तः। अत्रैवावसरे कैश्चित् सज्जनैः सभ्यदक्षिणां समर्प्य स्थायिसभ्यत्वमङ्गीकृतं सम्मेलनस्य।

ततः संस्कृतसाहित्यसम्मेलनस्य व्ययायाऽऽवश्यकं द्रव्यं संग्रहीतुं सर्वसम्मत्या काचित् परिभ्रम्य द्रव्यसंग्राहिणी (deputation) समितिर्व्यवस्थापिता। तस्याः सदस्याश्चैमे—

श्रीरामभद्रशर्म्मा ओझा एम्.ए. शिक्षाविभागाध्यक्षः अलवर
श्रीहरिप्रपन्नाचार्यः (इटावा)
श्रीशेषधरस्त्रिपाठी (प्रयागः)
श्रीगिरिधरशर्म्मा नवरत्नम् (झालरापाटनः)
श्रीव्रजनाथशर्म्मा गोस्वामी (आगरा)
श्रीसूर्यनारायण शर्म्मा (जयपुरम् संयेजकः)

सम्पन्ने त्वेतावति कार्यकलापे झालरापाटनस्थश्रीगिरिधरशर्मभिर्मद्रासमण्डलान्तर्गतकीलपाकस्थैः श्रीकृष्णमाचार्यमहोदयैश्च स्वस्वनगरे निमन्त्रितं सम्मेलनमागामिवर्षार्थमपरं मद्रासप्रान्ते संमेलनाधिवेशने कृते सुमहान् प्रचारः स्यात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतभाषाया इतिश्रीकृष्णमाचार्यमहोदयानामेव निमन्त्रण-मङ्गीकृतम्। ततः समयस्यालपत्वेऽपि चतुर्भिर्महाशयैः स्वस्व-निबन्धाःसंक्षिप्य श्राविताः। तेषां नामानि निम्ननिर्दिष्टानि—

श्रीचन्द्रधरमिश्रः (प्रयागः)

श्रीजानकीरमणमिश्रः ,,

श्रीकृष्णमाचार्यः 'सहृदया'-सम्पादकः कीलपाकः (मद्रासः)

श्रीकाशीराममहोदयः (प्रयागः)

एवं सर्वदा धर्म्मकर्म्मसंसाधनसमुद्यतस्य श्रीभगवतोऽ-मन्देनानुग्रहेण निर्विघ्नं समाप्तेषु सर्वेषु कार्येषु स्वागतकारि-ण्याः सभापतिना सुदूरदेशादागताय परमाद्भुतवैदुष्यभाजनाय श्रीटी-गणपतिशास्त्रिणे सम्मेलनसभापतये हार्दिका धन्यवादाः समर्पिताः। तेन संस्कृतसाहित्यसम्मेलनसभापतिवरणरूप-लोकोत्कृष्टगौरवप्रदानाय स्वागतकारिण्यै समितये सर्वेभ्यः समुपस्थितसज्जनेभ्यश्च धन्यवादा निवेदिताः। समाप्तिवक्तृता च सारगर्भिता श्राविता, यस्यां संस्कृते प्रचारमनाप्तानां बहूनां वैज्ञानिकशास्त्राणामुल्लेख आसीत्। तत्प्रकटनाय च सभ्याना-मुत्साहवर्धनं कृतमासीत्। प्रारम्भदिवसादारभ्याद्यपर्यन्तं सम्मेलनाभिवृद्ध्यर्थं प्रयतमानाय मन्त्रिणे श्रीगिरिधरशर्म-चतुर्वेदायापि च प्राधान्येन श्रीगङ्गानाथझामहोदयैरन्यैः सज्ज-नैश्च धन्यवादा दत्ताः। ततः सानन्दं विजयध्वनिपूर्वकं कृतं सभाविसर्जनम्।

———

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अखिलभारतवर्षीयसंस्कृतसाहित्यसम्मेलनस्य पञ्चमाधिवेशने स्वीकृताः प्रस्तावाः।

(१) अखिलभारतवर्षीयसंस्कृतसाहित्यसम्मेलनमिदं भारतचक्रवर्तिनः श्रीपञ्चमजार्जमहोदयस्य प्रवृत्ते युरोपीयमहासंग्रामे विजयं चिरमभ्युदयं च जगदीश्वरात् प्रार्थयते। राजभक्तिं च स्वीयां सुदृढां प्रकटयति।

प्रस्तोता—श्रीसभापतिः। सर्वैरनुमोदितः, स्वीकृतश्च।

(२) (क) इदं सम्मेलनं वाराणसीवास्तव्यानां महामहोपाध्यायश्रीशिवकुमारशास्त्रिणां शिवलोकप्राप्त्या सारस्वतमन्दिरस्तम्भभङ्गं सम्भावयत् संस्कृतक्षेत्रे परापतितं महान्तमन्तरायं च विचारयत् तद्विषये हार्दिकं खेदं महान्तं च शोकं प्रकाशयति।

(ख) इदं सम्मेलनमाहिताग्निश्रीशिवनारायणशास्त्रिणां, साहित्याचार्यश्रीगङ्गाप्रसादशास्त्रिणां (भरतपुर) श्रीदुर्गादत्तशास्त्रिणां (लाहोर) श्रीगङ्गाधरभट्टानां (जयपुर) च स्वःप्रयाणे ऽतितमां खेदमनुभवति।

प्रस्तोता—श्रीसभापतिमहाभागः।

(३) संस्कृतशिक्षाशैलीपरिशोधनार्थं निर्णीतानां प्रश्नानामुत्तरसंग्रहाय प्रसिद्धविदुषां समीपे पुनः पत्राणि प्रेष्याणि, उत्तरसंग्रहेच मासत्रयानन्तरं निम्ननिर्दिष्टनाम्नां महाशयानामेका संसत् प्रयागे संगत्य सर्वाः सम्मतीर्विचार्य पाठनसरणिं काञ्चन निश्चिनुयात्। स च निश्चय आगामिनि सम्मेलने विनिश्चयाय, उपस्थापनीयः स्यात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समितेः सभ्याः।

१ महामहोपाध्याय श्रीगङ्गानाथझाशर्म्माणः सभापतयः
२ श्रीसीतारामशास्त्रिणः [प्रयाग]
३ श्रीचन्द्रशेखरशास्त्रिणः [प्रयाग]
४ श्रीसदाशिवशास्त्रिणः [प्रयाग]
५ श्रीकाशीरामशास्त्रिणः [प्रयाग]
६ श्रीशालग्रामशास्त्रिणः [बरैली]
७ श्रीवामनाचार्याः [ग्वालियर]
८ श्रीसूर्यनारायणशास्त्रिणः [जयपुर]
९ श्रीरामभद्रशर्म्माणः [अलवर]
१० श्रीगिरिधरशर्म्माणः [जयपुर] [संयोजकाः]

प्रस्तोता—श्रीसूर्यनारायणशास्त्री [जयपुरस्थः] अनुमोदयिता श्रीशालग्रामशास्त्री [बरेलीस्थः] समर्थयिता-श्रीचन्द्रशेखरशास्त्री [प्रयागस्थः]

[४] इदं सम्मेलनं संस्कृतसाहित्यप्रचारार्थं निबन्धलेखकादिभ्यः कतिविधेभ्योविद्वद्भ्यः पदकपारितोषकादिकं योग्यतानुसारं समर्पयितुमिच्छति। एतादृशानुष्ठानसिद्ध्यर्थं द्रव्यसङ्ग्रह आवश्यक इति द्रव्यसङ्ग्रहार्थं निम्ननिर्दिष्टनाम्नां विदुषामेकां समितिं व्यवस्थापयति, या विभिन्नेषु देशेषु परिभ्रमणं कृत्वा द्रव्यसंग्रहं कुर्यात्।

नामानि—

१. श्रीरामभद्रशर्म्माणः (अलवर)
२. श्रीहरिप्रपन्नाचार्याः (इटावा)
३. श्रीशेषधरत्रिपाठिनः (प्रयाग)
४. श्रीगिरिधरशर्म्माणः (झालरापाटन)
५. श्रीव्रजनाथशर्म्माणः (आगरा)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६. श्रीसूर्यनारायणशर्म्मा (जयपुर) संयोजकः

प्रस्तोता—श्रीसीतारामशास्त्री

अनुमोदकः—श्रीगिरिधरशर्म्मा (झालरापाटन)

समर्थकः—श्रीअमृतरामनारायणशास्त्री (बरौदा)

(५) इदं सम्मेलनं विभिन्नप्रान्तीयसकलविद्यालय-प्रधानाध्यक्ष (Directors) महाशयान् सविनयं प्रार्थयते यत्तै-रध्यापनकलाविद्यालये संस्कृतपरीक्षोत्तीर्णानां शिक्षाकलाभ्यासाय कृपया व्यवस्था विधेया, येन लोकानां संस्कृताध्ययनानुरागः प्रवर्धेत ।

प्रस्तोता—श्रीपरमेश्वरानन्दः ।

अनुमोदयिता—श्रीगिरिधरशर्म्मा चतुर्वेदः ।

(६) (क) वाराणस्यां दरभङ्गामहाराजानां यासीत्सुविख्याता पाठशाला, यस्यामधीत्य बहवो महन्तो विद्वांसस्तत्र तत्र देशेषु विद्यां प्रचारयन्ति, तस्यै पाठशालायै साहाय्यदानं वर्त्तमानैः श्रीदरभङ्गामहाराजैः प्रतिरुद्धमिति सखेदं सम्मेलनमिदं पुनस्तान् तथाविधसाहाय्येन पाठशालाप्रचालनाय साग्रहं प्रार्थयते ।

(ख) यैश्च वैश्यकुलालङ्कारैः फूलचन्द्रमहाशयैः स्वद्रव्यव्ययेन पाठशालायै तस्यै हस्तावलम्बोदत्तस्तान् सम्मेलनमिदं सहर्षं धन्यवादपूर्वकं सभाजयति ।

प्रस्तोता—श्रीनारायणदत्तशास्त्री (प्रयाग)

अनुमोदकः—श्रीगिरिधरशर्म्मा चतुर्वेदः (जयपुर)

समर्थकः—श्रीशालग्रामशास्त्री (बरेली)

(७) द्वितीयादिसम्मेलनेषु पाठयितुं ये निबन्धा विद्वद्भिः प्रेषिता तेषु योग्यान् निबन्धान् सङ्गृह्यते मुद्रणप्रबन्धाय प्रयागे निम्ननिर्दिष्टानां सदस्यानामुपसमितिरेका व्यवस्थाप्यते । एषा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समितिः स्वसम्मत्या निबन्धान् मुद्रापयिष्यति। मुद्रणव्ययश्च प्रधानकार्यालयात्प्रदीयेत।

सदस्याः—

श्रीचन्द्रशेखरशास्त्री (शारदासम्पादकः) संयोजकः

श्रीसीतारामशास्त्री (प्रयाग)

श्रीशेषधरशास्त्री (प्रयाग)

(८) आगामिन्यब्दे सम्मेलनस्य कार्यकर्त्तारो निम्ननिर्दिष्टा-व्यवस्थाप्यन्ते—

(क) स्थायी सभापतिः कश्चिदपि न भवेत्। सम्मेलनाधिवेशनसभापतिरेवाब्दपर्यन्तं सभापतिर्मन्येत।

(ख) जयपुरस्था राजगुरुश्रीचन्द्रदत्तशास्त्रिणो व्याकरणाचार्या उपसभापतिपदमलंकुर्युः।

(ग) मन्त्री गिरिधरशर्म्मा चतुर्वेदः, सहकारिमन्त्रिणौ श्रीसूर्यनारायणशास्त्री (जयपुरस्थः) श्रीहररिहरस्वरूपशास्त्री (झुञ्झुरस्थः) च यथापूर्वं भवेयुः।

(घ) सम्मेलनस्य प्रधानकार्यालयो मन्त्रिणोऽधिकारे जयपुरएव नियम्यते।

(ङ) कार्यकारिण्याः समितेः सदस्यानिम्ननिर्दिष्टा भवेयुः।

पूर्वतनाः सभापतयः—

(१) म० म० डा० श्रीशतीशचन्द्रविद्याभूषणमहाशयाः प्रिंसिपलसंस्कृतकालेज (कलकत्ता)।

(२) परमहंसपरिव्राजकाचार्य जगद्गुरुश्रीशङ्कराचार्य गोवर्धनपीठाधिष्ठित १०८ मधुसूदनस्वामिनः (पुरी–उड़ीसा)

(३) म० म० श्रीहरप्रसादशास्त्रिणः (पाटल डाङ्गा स्ट्रीट) (कलकत्ता)

(४) मिथिलाधीश्वर महाराजश्रीरमेश्वरसिंहमहोदयाः (दरभङ्गा)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(५) विद्वत्प्रवर श्रीटी० गणपतिशास्त्रिणः क्यूरेटर मैनिस्क्रिप्ट्स त्रिवेन्द्रम् (ट्रावङ्कोर)

(प्रायेण साधारणसदस्येभ्यः संगृहीताः)

(राजपूतानाप्रान्ते)

(६) राजगुरुश्रीचन्द्रदत्तशर्म्माणो व्याकरणाचार्याः नीलगर नाला (जयपुर)

(७) श्रीसूर्यनारायणशास्त्रिणः व्याकरणाचार्याः (पुरानी बस्ती बडका कूआ जयपुर)

(८) श्रीमदनलालशास्त्रिणः, व्याकरणाचार्याः, पुरानी बस्ती नाहरगढ़ की सड़क (जयपुर)

(९) श्रीकन्हैयालालशर्म्माणः, न्यायाचार्याः, नीलगरनाला (जयपुर)

(१०) श्रीमथुरानाथशास्त्रिणः साहित्याचार्याः पुरानी बस्ती (जयपुर)

(११) श्रीकेदारनाथशर्म्माणः काव्यमालासम्पादकाः चौड़ा रास्ता संघी रोड (जयपुर)

(१२) गुलेरीत्युपाह्व श्रीसोमदेवशर्म्माणः चौड़ा रास्ता (जयपुर)

(१३) विद्यानिधिश्रीगिरिधरशास्त्रिणः चतुर्वेदाः व्याकरणाचार्याः, पान का दरीबा (जयपुर)

(१४) झेपाह्व श्रीरामभद्रशर्म्माणः एम्. ए. इन्स्पैक्टर स्कूल्स (अलवर)

(१५) श्रीभगवतीलालशास्त्रिणः कन्यापाठशाला चाँद बावड़ी (जोधपुर)

(१६) नवरत्नश्रीगिरिधरशर्म्माणः (झालरापाटन)

(१७) पञ्चाम्बुभूषणश्रीबुलाकीरामशास्त्रिणः विद्यासागराः मेयो-कालेज (अजमेर)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१८) गुलेरीत्युपाह्वश्रीचन्द्रधरशर्म्माणः बी० ए० मेयोकालेज (अजमेर)

(संयुक्तप्रान्तेभ्यः)

(१९) म०म० विद्वत्प्रवर श्रीजयदेवमिश्राः हिन्दूकालेज (काशी)

(२०) विद्वत्प्रवरश्रीदेवीप्रसादकवयः बांसका फाटक (काशी)

(२१) म० म० श्रीगङ्गानाथझा महाशयाः एम्. ए. प्रिन्सिपल गवर्नमेन्ट संस्कृतकालेज, काशी

(२२) श्रीकाशीरामशास्त्रिणः एम्.ए. स्पेशल संस्कृत इन्स्पेक्टर यू. पी. काशी

(२३) श्रीचन्द्रशेखरशास्त्रिणः साहित्याचार्याः शारदासम्पादकाः दारागंज-प्रयाग

(२४) श्रीसीतारामशास्त्रिणः म्योर सैण्ट्रल कालेज प्रयाग

(२५) श्रीगिरिजाप्रसादशर्म्माणः ज्यौतिषाचार्याः नवलकिशोर संस्कृत विद्यालय, गोमती तीर, लखनऊ

(२६) वेदपाठिश्रीविश्वनाथशर्म्माणः विष्णुघाट (हरिद्वार)

(२७) श्रीवंशीधरशर्म्माणः ऋषिकुल शाखा ज्वालापुर ज़िला सहारनपुर

(२८) श्रीपद्मसिंहशर्म्माणः नायक नगला ज़ि० बिजनोर

(२९) वैद्यरत्नश्रीहरप्रसादशर्म्माणः चिकित्सकचूड़ामणयः मोरगंज सहारनपुर

(३०) श्रीशालग्रामशास्त्रिणः साहित्याचार्याः तिवारी महल्ला, बरेली

(३१) गोस्वामिश्रीव्रजनाथशर्म्माणः शीतलागली आगरा

(३२) श्रीघनश्यामशर्म्माणः बेलन गंज आगरा

(३३) श्रीहरिप्रपन्नाचार्याः छिपेटी चोपार इटावा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३४) जोशी बाबा इत्युपाह्व श्रीशिवप्रकाशलालद्विवेदाः ज्योतिर्विदः मथुरा

(३५) गोस्वामिश्रीलक्ष्मणाचार्याः गोलपाडा मथुरा

(३६) क्षीरसागरोपाह्वश्रीवामनाचार्यशास्त्रिणः जमीदार हितकारिणी सभा ग्वालियर

(३७) विद्यानिधिविद्याभूषणश्रीरामप्रतापशास्त्रिणः मोरिस कालेज नागपुर सी० पी०

(पञ्चापप्रान्ते)

(३८) म० म० श्रीहरनारायणशास्त्रिणः विद्यासागराः नीलका कटरा देहली

(३९) श्रीगणेशदत्तशास्त्रिणः गुमटी बाज़ार लाहोर

(४०) श्रीरघुवरदयालुशास्त्रिणः एम्. ए. प्रिन्सिपल सनातनधर्म कालेज लाहोर

(४१) श्रीदेवराजशास्त्रिणः संस्कृत पाठशाला मुलतान

(४२) गोस्वामिश्रीयदुकुलभूषणशास्त्रिणः गोविन्दमन्दिर मुलतान

(४३) श्रीविश्वनाथशास्त्रिणः गवर्नमैण्ट हाई स्कूल पेशावर

(४४) म० म० श्रीमुकुन्दशास्त्रिणः श्रीनगर काश्मीर

(४५) म० म० श्रीजगदीशशास्त्रिणः राजगुरवः (सम्मेलन सहायकारी) जम्बू

(४६) श्रीहीरानन्दशास्त्रिणः एम्. ए. अन्वेषणविभागाध्यक्षाः (सुपरिण्टैण्डैण्ट आरक्योलाजी डिपार्ट मैण्ट) जम्बू

(४७) विद्याभूषणश्रीहरिहरस्वरूपशास्त्रिणः झज्झर जिला रोहतक

(४८) श्रीमुल्कराजशास्त्रिणः छत्ता नानूमल पटियाला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(विहारप्रान्ते)

(४९) श्रीरामावतारपाण्डेयमहोदयाः साहित्याचार्याः एम्. ए. संस्कृत प्रिन्सिपल हिन्दू विश्वविद्यालय हिन्दू कालेज बनारस

(५०) श्रीभरतमिश्राः सरस्वतीपाठशाला, सनातनधर्मसभा छपरा

(५१) श्रीबबुआरवां महाशयाः मन्त्री सर्वोपकारिणी धर्मसभा बनगांव पो० बरिआही ज़ि० भागलपुर

(बङ्गदेशे)

(५२) म० म० वैद्यरत्नश्रीगणनाथसेनमहोदयाः एम्. ए. एल्. एम्. एस. नं० ६२ बीडन स्ट्रीट कलकत्ता

(५३) श्रीअयोध्याप्रसादवर्माणः न० १३५ बलरामदे स्ट्रीट पो० शिमला कलकत्ता

(५४) श्रीभवविभूतिभूषणभट्टाचार्याः ए. ए. विद्योदयसम्पादका, भाटपाडा जिला चोबीस परगना

(५५) श्रीविधुशेखरभट्टाचार्याः हरिश्चन्द्रपुर (मालडा) (बैङ्गाल)

(मद्रासप्रान्ते)

(५६) श्रीमद्भगवद्रामानुजपीठाधिष्ठित प्रतिवादिभयंकरं श्री १०८ मदनन्तचार्याः मञ्जुभाषिणीसम्पादकाः (सम्मेलन-सहायकाः) काञ्ची (काञ्जीवरम्)

(५७) आसुरिश्रीअनन्ताचार्याः मालेश्वरम् बैङ्गलोर

(५८) श्री श्रीकृष्णामाचार्याः एम. ए. सहृदयासम्पादकाः श्रीरामेश्वरं संस्कृतपाठशालाध्यक्षाः मधुरा

(५९) श्रीमार्कण्डेयशास्त्रिणः (स्वधर्मप्रकाशिनीसम्पादकाः) गुण्टूर (मद्रास)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(६०) आयुर्वेदविद्याभूषणश्रीके० शेषशास्त्रिणः जगद्गुरुसंस्थान शृङ्गेरी (मैसूर)

(६१) वैद्यरत्न पण्डित श्री० डी० गोपालाचारलू महाशयाः आचार्यानस्ट्रीट जार्ज टाउन (मद्रास)

(६२) श्रीरामस्वामिशास्त्रिणः मुख्याध्यापकाः हैड्पण्डित क्यूरेट्स आफिस त्रिवन्द्रम् (ट्रावङ्कोर)

(मुंबई प्रान्ते)

(६३) श्रीमाधवेशाचार्यश्रीनिवासाचार्याः व्याकरणाचार्याः, पाठशालाध्यापक रामदुर्ग S. m. E. जि० बेलग्राम (मुम्बई)

(६४) श्रीहाथीभाई शास्त्रिणः राजपण्डिताः जामनगर काठियावाड़

(६५) रायबहादुर श्रीकमलाशङ्कर प्राणशंकर त्रिवेदिनः हाबड़िया चकला सूरत

(६६) श्रीअमृतरामनारायणशास्त्रिणः राजपण्डिताः बरौदा

(६७) शुद्धाद्वैतभूषण श्रीरमानाथ शास्त्रिणः बड़ा मन्दिर भूलेश्वर मुम्बई

[६८] कवि-काव्यरत्नाकर, शु० भू० भट्ट श्रीबलभद्रशर्माणः बड़ा मन्दिर भूलेश्वर मुम्बई

[६९] श्रीकाशी शेष वेङ्कटाचलशास्त्रिणः खत्रीचाल, गिरगांव बैङ्करोड मुम्बई

[७१] श्रीयादवजी त्रीकमजी वैद्यमहाशयाः होली चकला फोर्ट मुम्बई

[७०] कार्त्तान्तिक श्रीकृष्णमोहनदासजी शर्माणः भूरुबा बिल्डिङ्ग पोस्ट नं० २, मुम्बई

इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बरेलीवास्तव्यसाहित्याचार्यश्रीशालग्रामशास्त्रिद्वारोपनतः

सुरभारतीसन्देशः ।

गीतिः

अयि वन्दनीयभावाः ! सदया ! महानुभावाः !
भवतोऽवतो रसज्ञान् सुरभारतीदमाह ॥ १ ॥
विनयो नयोचितश्चेन्न निरादरो विधेयः ।
दरकारणं विचेयं गदवारणं विधेयम् । ॥ २ ॥
अधिकर्णमर्पणीया सुचिरं विचारणीया ।
हृदये निवेशनीया सुरभारतीकथेयम् ॥ ३ ॥
'इदमस्ति भारतं मे ननु भारतोयमस्मि ।
सुरतामुपेतवन्तो मम भावमाश्रिता ये ॥ ४ ॥
प्रलयोदयौ तु सृष्टेः शतशो मयानुभूतौ ।
जगदादिसंविधा मे नयनाग्रतः स्फुरन्ति ॥ ५ ॥
कमलासनः स वक्ता ऋषयः श्रुतार्थिनस्ते ।
सहचारिणी च साऽहं जगतः पितामहस्य ॥ ६ ॥
नवसर्गवर्गवेदीवेदोपदेशयज्ञे ।
स्मृतिगोचरीभवन्ती परिमोहयत्यजस्रम् ॥ ७ ॥
कुरुते पुरोगतं योऽखिलभूतभाविभव्यम् ।
मयि सा समाधिविद्या बहुभिः समाहितेयम् ॥ ८ ॥
मनसामनेषणीयं वचसामगोचरं यत् ।
न तदक्षरं विदूरे ननु मे स्तनन्धयानाम् ॥ ९ ॥
विषयावलीवलोढा ज्वलदाधयो विदूनाः ।
मम सन्निधौ समेताः शममाशु संश्रयन्ते ॥ १० ॥
जगतीतलं च जित्वा बहुलैर्बलैरुदग्राः ।
मम सूनसङ्गमेन महिमानमुत्सृजन्ति ॥ ११ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परिचारिता पृथिव्यामिह सा मयैव नीतिः ।
अबलो यया बलीयान् बलवत्सु निर्विशङ्कम् ॥ १२ ॥
इह धर्मभीतिरेषा परलोकगीतिरेषा ।
परिलक्षिताऽन्यगेहे कतमेन वा ? क्वेयम् ? ॥ १३ ॥
स्मरणीयनीतिविद्या निखिलाऽवनीहिता या ।
रामादिभूपभूषा परिपोषिता मयेयम् ॥ १४ ॥
ऋषयो वशिष्ठमुख्या मम रक्षिणो यदाऽऽसन् ।
परिचारिका तदा मे जगदाधिराज्यलक्ष्मीः ॥ १५ ॥
कपिलः पतञ्जलिस्तौ कणभुक्प्रशस्तपादौ ।
पुलिनोद्भवो महर्षिः स च जैमिनिर्मुनीशः ॥ १६ ॥
अमृतं निषिक्तवन्तो मम यत्कलेवरे ते ।
नहि तद्भिया यमो मे दिशि दत्तदृक् कदापि ॥ १७ ॥
अजरीकरः प्रयोगः पणिनात्मजेन यो मे ।
मुनिना कृतः शरीरे परिवर्तनं स रुन्धे ॥ १८ ॥
कविकालिदासदत्तं नयनामृतं मदीये ।
कुरुते दृशौ सशक्ते परिलोकितुं दिगन्तम् ॥ १९ ॥
इतिवृत्तमेतदेवं हहहा गतं तदेवम् ।
अधुना तु शोचनीयं कुदशान्तरं गताहम् ॥ २० ॥
अलसो विमूढचेताः सकलोपि मे स्ववर्गः ।
सकलेशताविहीना बत दुर्गतिं वहेऽहम् ॥ २१ ॥
जगदाधिराज्यलक्ष्मीललितौ यदीयपादौ ।
वसनाशनाय साऽहं सदयं सभासु याचे ॥ २२ ॥
बसनाशनैर्मदीयैरुपजीविता यदाम्बा ।
कथयन्ति हन्त ते मां 'हतभागिनी मृतेयम्' ॥ २३ ॥
भृशमस्मि जातलज्जा भवदीयपौरुषेषु ।
दलितामहो, यदन्यैर्ननु मातरं सहध्वम् ॥ २४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वरमस्मि बन्ध्यगर्भा न पुनर्निरीहमन्दैः ।
अलसैः सुतैरसंख्यैरिह पुत्रिणी भवेयम् ॥ २५ ॥
मम दुर्गतं न चिन्त्यं मरणं वरं मदीयम् ।
न पुनः सपत्नजानां कटुभाषितं सहेयम् ॥ २६ ॥
किमिदं न शोचनीयं निमिषत्सु हा, भवत्सु ।
यदहं स्वयं सशल्या समराय साधयेयम् ॥ २७ ॥
स्मरणीयमेतदद्धा ननु सा समाधिसिद्धिः ।
विपदेकरक्षिणी मे जगदादिभूविसृष्टा ॥ २८ ॥
तदहं बहु प्रदूना न च रक्षिता भवद्भिः ।
करुणाभयान्तरां तां सुसखीं समाश्रयेयम् ॥ २९ ॥
शयिता तदङ्कशय्यामधिशय्य निर्विशङ्कम् ।
चिरकालजातबोधा पुनरप्यहं वहेयम् ॥ ३० ॥
परमेतदेव चिन्त्यं वदनेषु वो विलग्ना ।
मलिनाकलङ्कलेखा सुशका विमार्जितुं किम् ॥ ३१ ॥
जननीमरक्षयित्वा सुकृतं च भक्षयित्वा ।
किमु जीवनाय कश्चिद् वरसंश्रयं गताहम् ॥ ३२ ॥
तदतः परं न शक्ता गदितुं सगद्गदाऽहम् ।
रहसि स्थिता विशङ्कं करुणञ्च रोदयेयम् ॥ ३३ ॥
विनयो नयोचितश्चेन्न निरादरो विधेयः ।
दरकारणं विचेयं गदवारणं विधेयम् ॥ ३४ ॥
अधिकर्णमर्पणीया सुचिरं विचारणीया ।
हृदये निवेशनीया सुरभारतीकथेयम् ॥ ३५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अ. भा. व. संस्कृतसाहित्यसम्मेलनसम्बन्धिनो रायव्ययथोः चतुर्थस्य वर्षस्य सम्भूय गणना।

आयः

पूर्वशेषः	६६॥≋॥)
एककालिकं साहाय्यप्रयुक्तं दानं प्राप्तम्	६४।)
सदस्य दक्षिणा वार्षिकी	५३)
निबन्धावली विक्रयस्य	१३॥=)
	२३०॥-)॥

शतद्वयं त्रिंशच्च रूप्यकाणाम् सार्द्धनवानकानि च।

व्ययः

मुद्रापणा व्ययः... ...	६१)
तृतीयचतुर्थाब्द कार्य विवरणस्य...	७१॥।≋)॥
शिक्षा सम्बन्धि प्रश्नावली मुद्रापणे...	११)॥
कार्ड लघुपत्र मुद्रापणे... ...	३)
सदस्यप्रतिज्ञापत्र मुद्रापणे	५)
वस्तुक्रये...	॥।=)
पत्रादि प्रेषणव्ययः	५।≋)।
	८७।-)।

सप्तनवती रूप्यकाणि सपादपञ्चानकानि च शिष्यन्ते—

१३३॥)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रयस्त्रिंशदधिकंशतं
रूप्यकाणि सपादं,
चतुरानकानि च
गिरिधर शर्म्मा
माघ शु० १ सं० १९७४
१३—२—१८

संस्कृतसाहित्यसम्मेलनस्य साधारणसदस्यानां नामावली

सं०	नाम	प्रतिवर्ष दातुं प्रतिज्ञातं द्रव्यम्।
१	डाक्टर श्रीगणनाथसेनः एम्० ए०, एल्० एम्० एस० नं० ६२ बीडन स्ट्रीट कलकत्ता	२ रु०
२	श्रीकमलाशङ्कर-प्राणशङ्करः त्रिवेदी, हबड़िया चकला सूरत (मुम्बई)	१ रु०
३	श्रीआर्यवंशयतिः स्वामी प्रिंसिपल मङ्गलराम विहार बेरूवाला (सीलोन)	५ रु०
४	श्रीहरिशङ्करशर्म्मा संस्कृत-पुस्तकालय हरिद्वार	१ रु०
५	श्रीगोविन्दरामशर्मा संस्कृताध्यापकः दुगड्डा (गढ़वाल)	१ रु०
६	श्रीजयदेवशर्मा द्विवेदी (हाईस्कूल संस्कृताध्यापक हापुड़, मेरठ	१ रु०
७	श्रीअयोध्याप्रसादवर्मा नं० १३५ बलरामदेव स्ट्रीट पो० शिमला, कलकत्ता	२ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८ श्रीरमानाथशर्म्मा शुद्धाद्वैतभूषणम्, बड़ा मन्दिर, भूलेश्वर, मुम्बई २ रु०

९ म०म० श्रीमुकुन्दरामशास्त्री, श्रीनगर, काश्मीर २ रु०

१० श्रीविश्वनाथशास्त्री, भा० ध० म० महोपदेशकः, गवर्नमेंट हाई स्कूल, पेशावर २ रु०

११ श्रीठाकुर-कुवेरसिंह-मथुरसिंहः राजपूत बाड़ा, पो० खम्भात, गुजरात (मुम्बई) १ रु०

१२ वैद्यरत्न श्रीहरिप्रसादशर्मा, मोरगंज, सहारनपुर १ रु०

१३ श्रीहीरानन्दशास्त्री क्यूरेटर म्यूज़ियम लखनऊ २ रु०

१४ श्रीबबुआ खाँ, सेक्रैटरी सर्वोपकारिणी धर्मसभा, बनगाँव, पो० बरिआही, जि० भागलपुर (विहार) २ रु०

१५ गोस्वामी श्रीलक्ष्मणाचार्यः गोलपाड़ा मथुरा १ रु०

१६ श्रीसूर्यनारायण शर्मा व्याकरणाचार्यः, न्यायशास्त्री, पुरानी बस्ती, बड़का कुवा, जयपुर (राजपूताना) १ रु०

१७ श्रीभगवतीलालशर्मा, कन्यापाठशालाध्यापकः, चांद बावड़ी, जोधपुर २ रु०

१८ श्रीगिरिजाप्रसादः द्विवेदी, प्रधानाध्यापक, नवल-किशोरविद्यालय, गोमतीतट लखनऊ। २ रु०

१९ कविः, काव्यरत्नाकरः भट्टश्रीबलभद्रशर्माशुद्धाद्वैत-भूषणम्, बड़ा मन्दिर भूलेश्वर मुम्बई २ रु०

२० श्रीविधुशेखरभट्टाचार्यः साहित्यचार्यः हरिश्चन्द्रपुर मालदा बङ्गाल १ रु०

२१ श्रीहरिहरस्वरूपशास्त्री विद्याभूषणम् झङ्झर जि० रोतकह १ रु०

२२ श्रीबापू-देव अमृतरामः शास्त्री उपाध्यायः पञ्चमहाल पोस्ट सेराप्रान्त गोधरा (केरा) १ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२३ श्रीहरिकृष्णशर्मा C/O वैद्य रघुनाथजी व्यास, गली चाह मथुरा १ रु०
२४ श्रीरामचन्द्रः चक्रवर्त्ती तुलसी चौंतरा, मथुरा १ रु०
२५ भट्टश्रीगिरिधरशर्मा, अलवरस्थाः, गोकुलेश मन्दिर, गोकुल, (मथुरा) १ रु०
२६ श्रीदयाशङ्करपाठकः रामदासकी मण्डी, मथुरा १ रु०
२७ श्रीघनश्यामलाल-बुलाकीरामः पंड्या गोलपाड़ा, मथुरा १ रु०
२८ श्रीनवनिधिराम-बल्लभरामः पंड्या, गोलपाड़ा, मथुरा १ रु०
२९ श्रीरमेशदत्तः, कोसी, जि० मथुरा १ रु०
३० श्रीशम्भुदत्तः, रतनकुण्ड, मथुरा १ रु०
३१ श्रीमगनशास्त्री भट्टः, तुलसी चबूतरा, मथुरा १ रु०
३२ श्रीहरिप्रपन्नाचार्यः छिपेटी, इटावा १ रु०
३३ श्रीमाधवशर्मा, शास्त्री जयपुर एजेन्सी, चौड़ा रास्ता जयपुर २ रु०
३४ श्रीमदनशर्मा, प्रश्नवरः, व्याकरणाचार्यः पुरानी बस्ती, नाहरगढ़ की सडक, जयपुर १ रु०
३५ श्रीबहोरीदत्तः शास्त्री सुधर्म पाठशाला, पो० गौतम, (अलीगढ़) १ रु०
३६ श्रीअमरनाथः उपदेशकः जलालपुर जट्टां, गुजरात (पञ्जाब) १ रु०
३७ श्रीमुल्कराजशर्मा, छत्ता नानूमल (पटियाला) १ रु०
३८ श्रीश्रवणलालशर्मा महोपदेशकः, झालरापाटन, (राजपूताना) १ रु०
३९ श्रीगङ्गाविष्णुशर्मा, लार्डगंज, जबलपुर, सी० पी० १ रु०
४० श्रीठाकुरप्रसादसिंहः, स्टेशन बलरामपुर, जि० गोंडा १ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४१ श्रीमार्कण्डेयशर्मा, सम्पादक, स्वधर्मप्रकाशिनी, कुण्टूर (मदरास प्रान्त) १ रु०

४२ श्रीवेङ्कटकृष्णशर्मा गुण्टूर १ रु०

४३ श्री लक्करात्र वेङ्कटगोपालशर्मा डिप्टी अकाउण्टैण्ट कलैक्टर्स आफिस गुण्टूट १ रु०

४४ श्रीदेवीलाल-श्रीनिवासशर्माणौज्योतिर्विदौ मारवाड़ मूँडवा (जोधपुर) ३ रु०

४५ पी० एम्० श्रीरङ्गाचारी सब असिस्टैण्ट इन्स्पेक्टर आफ स्कूल्स धर्मपुरी जि० सालम मद्रास प्रान्त १ रु०

४६ श्रीरामप्रतापशास्त्री विद्याभूषणम्, विद्यानिधिः, संस्कृत प्रोफेसर गव्हर्नमैण्ट मोरिस कालेज, नागपुर सी० पी० २ रु०

४७ श्रीघनश्यामशर्मा बेलनगंज आगर १ रु०

४८ श्रीकाशीरामशस्त्री एम्० ए०, एस० सी० स्पेशल इन्स्पेक्टर संस्कृत यूनाइटेड प्राविन्सज़, काशी १ रु०

४९ श्रीभवानीप्रसादगुप्तः रईस हलदोर जिला बिजनोर २ रु०

५० श्रीकन्हैयालालशास्त्री न्यायाचार्यः धाभाई का खुरा जगन्नाथजी के मन्दिर के समीप जयपुर १ रु०

५१ श्रीवामनाचार्यः क्षीरसागरः इन्सपेक्टर जमीदार-हितकारिणी सभा ग्वालियार ५ रु०

५२ श्रीकाशीशेषवेङ्कटाचलशास्त्री मैसूरमहास्थानमध्य-प्रविष्टो महा विद्वान्, खत्री चाल गिरगांव बेङ्करोड मुम्बई १ रु०

५३ श्रीभरतमिश्रः सरस्वती पाठशाला सनातन धर्म सभा छपरा (विहार) १ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५४ प्रतिवादिभयङ्करं श्रीअनन्ताचार्यः मञ्जुभाषिणी सम्पादकः काञ्चीवरम् (?)

५५ श्रीगणपतिशास्त्री कलवराई पोस्ट वाविली (बिजाग) मद्रास १ रु०

५६ श्रीगिरिधरशर्मणो धर्मपत्नी झालरापाटन (राजपूताना) १ रु०

५७ श्रीगिरिधरशर्मा नवरत्नम् झालरापटन (राजपूताना) १ रु०

५८ श्रीइच्छाशङ्करशर्मा द्वारा पं० गौरीशङ्करजी शुक्ल स्वामीघाट मथुरा १ रु०

५९ श्रीजवाहिरलालशास्त्री दि० जैनः जौहरीबाजार (जैनपुर) १ रु०

६० श्रीरामकृष्ण-तर्कशास्त्री बदरीबाबले की हवेली हरिद्वार १ रु०

६१ श्रीविश्वनाथः वेदपाठी विद्वत्समितिमन्त्री विनायक मिश्र की धर्मशाला विष्णुघाट हरिद्वार १ रु०

६२ श्रीवंशीधरः ऋषिकुलशाखापाठशाला ज्वालापुर जि० सहारनपुर १ रु०

६३ श्रीशालग्रामशास्त्री साहित्याचार्यः तिवारी महल्ला बरेली यू० पी० १ रु०

६४ श्रीचन्द्रधरशर्मा गुलेरी बी०ए० मेयोकालेज अजमेर १ रु०

६५ श्रीदेवराजशास्त्री संस्कृत पाठशाला मुलतान (पंजाब) २रु०

६६ श्रीअमृतरामनारायणशास्त्री राजपंडितः बरौदा १ रु०

६७ श्रवंशीधरः पुरोहित गुरु रामराय साहिब देहरादून १ रु०

६८ श्रीरामलालशास्त्री गव्हर्नमेण्ट हाईस्कूल झंग (पञ्जाब) १रु०

६९ श्रीघुल्लुरामशास्त्री महल्ला कच्चा पटियाला (पञ्जाब) १ रु०

७० श्रीपरमानन्दशास्त्री एम्०बी० स्कूल लायलपुर (पंजाब) १रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

७१ श्रीगणेशदत्तशास्त्री ओरिएण्टेल कालेज लाहोर १ रु०
७२ श्रीचेतरामशास्त्री संस्कृताध्यापकः गव्हर्नमेण्ट हाई-स्कूल गुजराँवाला पंजाब १ रु०
७३ श्रीमनसारामशास्त्री अध्यापकः सनातनधर्म हाई-स्कूल रावलपिंडी (पंजाब) १ रु०
७४ श्रीभोलानाथशास्त्री म्यूनिसिपल बोर्ड संस्कृत विद्यालय मुख्याध्यापक मुलतान (पंजाब) १ रु०
७५ श्रीअमरनाथशर्मा सारस्वतः नं० ३४ गोलागली बनारस सिटी १ रु०
७६ श्रीगोस्वामी यदुकुलभूषणशर्मा गोविन्दमन्दिर मुलतान सिटी (पंजाब) १ रु०
७७ श्रीलालागुरुबख्शरायः विज्ञः सब्जमण्डी गुजरांवाला (पंजाब) १ रु०
७८ श्रीरघुनाथवर्मा शास्त्री C|o श्रीवल्लभदास जगन्नाथ कनकमण्डी मुलतान सिटी (पंजाब) १ रु०
७९ श्रीराधाकृष्णवर्मा शास्त्री C|o भाई चूहाराम भाई चेलाराम गोदरी बाज़ार मुलतान सिटी (पंजाब) १ रु०
८० श्रीभगवद्दत्तशर्मा C|o श्रीयुत भाई गणेशदास भाई भवनीदास मुलतान सिटी (पंजाब) १ रु०
८१ श्रीजानकीप्रसादशर्मा धर्मकूप काशी १ रु०
८२ श्री पं० डी० गोपालाचारलू वैद्यरत्नम् मद्रास १० रु०
८३ श्री के० शेषशास्त्री जगद्गुरुसंस्थानपंडितः शृङ्गेरी (मैसूर) १ रु०
८४ श्रीसुमन्तुशर्मा मन्त्री सनातनधर्मसभा कोर्बा (बिलासपुर) सी० पी० १ रु०
८५ श्रीपद्मनाथ शर्मा मिश्रः बलोदा बिलासपुर सी० पी० १ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८६ श्रीशास्त्री रामचन्द्रपाधे पनसबाड़ी जगन्नाथचाल मुम्बई १ रु०

८७ श्रीरमापतिशास्त्री मिश्रजी जी० टी० संस्कृत कालेज ग्रांटरोड मुम्बई १ रु०

८८ श्रीयादवजग त्रीकमजी वैद्यः होली चकला फोर्ट मुम्बई १ रु०

८९ श्रीलक्ष्मीशङ्कर-रामकृष्णशास्त्री आयुर्वेदोपाध्यायाः सांकड़ीसेरी अहमदाबाद १ रु०

९० श्रीमणिशङ्करहरिशङ्करः ठाकुरद्वारा राधाबिल्डिङ्ग मुम्बई १ रु०

९१ श्रीशास्त्री मोतीरामकल्याणजी माया देवी संस्कृत पाठशाला मुम्बई १ रु०

९२ श्रीशास्त्री अम्बाशङ्कर कल्याणजी भूलेश्वर फिरङ्गीनादेवल पासे मावानी चाल मुम्बई १ रु०

९३ श्रीशास्त्री इच्छाशङ्कर-विजयरामः श्रीजगन्नाथयाञ्झिकसंस्कृतपाठशाला भूलेश्वर भगवतवाड़ी मुम्बई १ रु०

९४ श्रीशास्त्री हरिशङ्कर-जीवनरामः भूलेश्वर फिरङ्गीकादेवल पासे मावानी चाल मुम्बई १ रु०

९५ श्रीशास्त्री विश्वनाथ-कृपाशङ्करः दामोलनी बाड़ी कालवादेवी मुम्बई १ रु०

९६ श्रीशास्त्री नाथजी-मोहनजी व्यासः बी० ए० नं० ११२ मीएटरोड रतनसी गोकुलदास नो मालो कोट मुम्बई १ रु०

९७ श्रीत्रिभुवनरामशर्मा जूनी हनुमानगली कालवादेवी रोड कानजी चत्तूहाउस मुम्बई १ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९८ श्रीलक्ष्मणनारायणः शास्त्री C/o विश्वनाथ मदन गिरगाँव मुम्बई १ रु०

९९ श्रीशास्त्री नाथालाल मङ्गलजी तीसरा भोईवाड़ा भूलेश्वर रणछोड़दास बाला भाई का मालामें दूसरा माला मुम्बई १ रु०

१०० श्रीबदरीनाथः वी० पू० शर्मा रसवैद्यः सर्वोपकारी रसौषधालय मोटी हवेली के सामने तीजा भोई वाड़ा भूलेश्वर मुम्बई १ रु०

१०१ श्रीज्योतिर्वित सीताराम-श्रीकृष्णजम्भेकरः कालकादेवी मुम्बई १ रु०

१०२ श्रीशास्त्री सोहनलाल-नारायणः पाईधुनी जीवराजबालूनू माले दूसरे माले मुम्बई १ रु०

१०३ श्रीवेणीराम-पुरुषोत्तमः गुलालवाड़ी सत्यनारायण का मन्दिर मुम्बई १ रु०

१०४ श्रीमायाशङ्कर-जयशङ्करः जोशी जयपुरीयः विट्ठलवाड़ी द्वारकानाथजी का मन्दिर के पिछाड़ी धनजी मूलजी का वाड़ा मुम्बई १ रु०

१०५ श्रीवासुदेवशास्त्री पणसीकरः निर्णयसागर प्रेस कालवादेवीरोड मुम्बई १ रु०

१०६ श्रीहरिदत्तशास्त्री श्रीवेङ्कटेश्वरप्रेस खेतवाडी मुम्बई १रु०

१०७ श्रीपोपटलाल-मूलजी कालबादेवी रोड जहवेर बाग मुम्बई १ रु०

१०८ श्रीव्यासयागेश्वरमयाशङ्करः मावजी प्रेमजी की बाड़ी कालवादेवी रोड मुम्बई १ रु०

१०९ श्रीशास्त्री हरगोविन्द-यदुरामः सेठ वशनजी मनजी पाठशाला जूनी हनुमानगली कालवादेवी मुम्बई १ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

११० श्रीशविशङ्कर–ज्येष्ठारामः पं० नारायणमूलजी पुस्तकालय जह्वेर वाग मुम्बई १ रु०

१११ कार्तान्तिकः श्रीकृष्णमोहनजीशर्मा भरूचा बिल्डिङ्ग पोस्ट नं० २ मुम्बई १ रु०

११२ श्रीपार्वतीवल्लभ–गोविन्दवल्लभः शास्त्री काव्यतीर्थ सोरों जिला एटा १ रु०

११३ श्रीनिगमशङ्करशर्मा S/o श्रीकृष्णशङ्करशर्मा द्विवेदी हवाडिया चकला सूरत (मुम्बई) ५ रु०

११४ श्रीन्यायशास्त्री भवानीशङ्करः सुखठणकर पाठशालाध्यापक गिरगांव मुम्बई १ रु०

११५ श्रीदशरथशास्त्री सिद्धान्तवागीशः सोरों जि० एटा १ रु०

११६ श्रीकल्याणजी–कानजीशास्त्री गोकुलाधीश मन्दिर मुम्बई १ रु०

११७ श्रीमाधवजी गोपालजी वैद्यशास्त्री कालवादेवी रोड खत्री की वाड़ी मुम्बई १ रु०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतसाहित्यसम्मेलनस्योद्देश्यानि नियमाश्च ।

उद्देश्यानि

( ) अस्माकं भारतवर्षीयाणामालस्योपेक्षादिदोषवशात् क्रमशो ह्रासमुपगच्छन्त्यास्तत्रभवत्याः संस्कृतभाषायाः पुनः प्रचारणमेवास्य संमेलनस्य मुख्यं प्रथमञ्चोद्देश्यम् ।

(२) संस्कृतभाषाया अध्यापनपद्धतौ चिराद् व्यवह्रियमाणं प्राचीनं क्रममुपजीव्य सौकर्यावहस्येदानीन्तनस्यापि (तस्य क्रमस्य) समुपनिवेशोऽस्य द्वितीयमुद्देश्यम् ।

(३) संस्कृतभाषां महतः क्षयादपवारयितुं ब्रिटिशसाम्राज्येन महत्यवलम्बे दीयमानेऽपि ततोऽप्यधिकतरावलम्बदानार्थमभ्यर्थनमस्य तृतीयमुद्देश्यम् ।

(४) एतद्देशप्रसूता अपि ये धर्ममर्मोपदेशिन्याः संस्कृतभाषायाअनभिज्ञास्तेषामेतज्ज्ञानसंपादनाय प्रवर्तनमस्य चतुर्थमुद्देश्यम् ।

(५) सर्वेष्वपि संस्कृतज्ञेषु संस्कृतानुरागिषु च संभूय कार्यसंपादनपरिपाटीस्पृहयालुतामुपजन्यपरस्परसौहार्दसंस्थापनोद्योगोऽस्य पञ्चममुद्देश्यम् ।

(६) बहुसभ्यानुमोदितस्य कस्यचित्स्थिरकार्यस्यापि सम्पादनप्रयत्नमस्य षष्ठमुद्देश्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नियमाः

(१) संस्कृतभाषायाः सेवार्थं प्रवर्तमानानां विदुषामस्याः सभायाः "संस्कृतसाहित्यसम्मेलनम्" इति नाम स्यात् ।

(२) अस्य सम्मेलनस्य सभ्या द्विविधाः स्युः—संस्कृतज्ञाः संस्कृतानुरागिणश्च ।

(३) सर्वेषामेव सभ्यानां संस्कृतभाषाया अभ्युन्नतये प्रयतनं, वार्षिकोत्सवसमये स्वयमुपस्थाय कार्येषु योगदानं, निबन्धादिरचनं चेत्यादिकर्तव्यानि स्युः । प्रत्येकं चैकरूप्यकादन्यूनं संमेलनसाहाय्यायावश्यं दातव्यं स्यात्, अधिकं तु यथाशक्ति दीयमानं सादरं गृह्येत ।

(४) अस्य सम्मेलनस्य वार्षिकोत्सवः प्रतिवर्षं कुत्रचिद्बहुसभ्यानुमोदितेप्रसिद्धे तीर्थस्थाने नगरे वा स्यात् ।

(५) तेषु तेषु प्रदेशेष्वस्य सम्मेलनस्य शाखासभाः स्युः, तत्तत्प्रदेशवासिनश्च संस्कृतानुरागिणस्तासां सभ्यपदवीमलं कुर्वीरन् ।

(६) प्रधानसम्मेलनेन निर्धारितेषु विषयेषु तैस्तैर्विद्वद्भिः स्वस्वरुच्यनुसारं निबन्धा लेख्येरंस्ते च वार्षिकसम्मेलने श्राव्येरन् । बहुसभ्यानुमोदनानुसारं ये निबन्धाः श्रेष्ठा उपयुक्ताश्च ज्ञायेरँस्तेषां मुद्रापणार्थमपि सम्मेलनेन प्रयत्नः क्रियेत ।

(७) तत्तत्प्रदेशेभ्यः सुप्रसिद्धान् विदुषः संगृह्य तेषामेका कार्यकारिणी समितिर्नियम्येत, या सम्मेलनस्य सर्वं कार्यं समये समये कुर्यात् । अस्या एकपञ्चाशतं सदस्या भवेयुः । सप्तदशानां चोपास्थितिः कार्यारम्भायावश्यकी मन्येत । स्वयमनुपस्थितानां लिखितप्रेषिता सम्मतिरपि संख्यायां गण्येत । अधिकसम्मत्या च प्रस्तावनिर्णयः स्यात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

अयि संस्कृतानुरागिणो महाभागाः !

यदि काम्यते सुरभारत्याः समुन्नतिः, यास्माकं सर्वस्वम्, यया वयमुपजीवामः ययैव च लोके प्रतिष्ठामधिगच्छामः, तस्याः संस्कृतभाषायाः कृतज्ञताप्रकाशने यद्यस्ति मनाग-प्युत्साहः, तर्हि अखिलम्बितंसंस्कृतसाहित्यसम्मेलनस्य सद-स्यता स्वीक्रियताम्। येन सम्पन्नायां संघशक्तौ सर्वं सुकरं भवेत्। उद्देश्यानि नियमाश्च पृष्टतोवलोक्यानि। सदस्येच्छितं (फार्म) पत्रं कार्यालयात् "गिरिधरशर्म्मा चतुर्वेदः, सना-तनधर्म कालेज लाहोर।" इतिसंकेतेन प्राप्यते। तत्रैव तत्प्र-पूर्यं प्रेषणीयम्। स्वयमेव वा साधारणे पत्रे अग्रपृष्ठे विलिख्य प्रेषणीयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

मया खलु सहर्षं निखिलभारतवर्षीय-श्री संस्कृतसाहित्य सम्मेलनस्य सदस्यता स्वीक्रियते। सम्मेलनसाहाय्यार्थं .....परिमितं द्रव्यं प्रतिवर्षं प्रदास्यते। प्रथमाब्दस्य.....रूपकाणि कार्यालये प्रेष्यन्ते। सम्मेलनस्योद्देश्यानां प्रपूर्तये यथाशक्ति यतिष्ये।

तिथि..... } निवेदकः

नाम _____

पत्रप्राप्तेः पूर्णः सङ्केतः _____

निवासस्थानम् _____

पत्रप्रापणालयप्रान्त मण्डलादिसहितम् } _____

---

(१) प्रतिवर्षमेकरूपकप्रदानं साधारणसभ्यानां नियतम्। अधिकन्तु यथाशक्ति प्रदेयमेवेति।

Kirtikant Sharma Collection, Najafgarh